**About the Book**

A single manuscript of this commenta the Sāṁkhya Kārikā is preserved in the Jesa Bhandar. In Dr. Solomon's view, of all the mentaries this Vṛtti has the fairest claim to the original of Paramārtha's Chinese Versic the Notes she has shown the parallelism at le She is also of the view that this is the earli the extant commentaries.

[From Publisher's Fore

**Price Rs. : 5=**

**Gujarat University**

# सांख्यवृत्तिः ($V_2$)

# Sāṁkhya-Vṛtti ($V_2$)

*Edited by*


**Dr. Esther A. Solomon**
M. A., Ph. D.,
School of Languages,
Gujarat University,
**Ahmedabad**



**Gujarat University**
Ahmedabad-9.

**First Edition ]** [ 1973

(c) Gujarat University : 1973

**Price Rs 5-00**

Printed by
**Mahant Shree Tribhuvandasji Shastree,**
**Ramanand Printing Press,**
**Kankaria Road,**
**Ahmedabad-22.**

Published by
Shri Kanchanlal C. Parikh,
Registrar,
Gujarat University,
Ahmedabad-9.

# FOREWORD

It gives me great pleasure, indeed, in publishing Dr. (Miss) Esther A. Solomon's book entitled "Sāṁkhya-Vṛtti."

A single manuscript of this commentary on the Sāṁkhya Kārikā is preserved in the Jesalmere Bhandar. In Dr. Solomon's view, of all the commentaries this Vṛtti has the fairest claim to being the original of Paramārtha's Chinese Version. In the Notes she has shown the parallelism at length. She is also of the view that this is the earliest of the extant commentaries.

I am most thankful to Dr. E. A. Solomon for agreeing to the publication of this work which was undertaken as a research project in the School of Languages of the Gujarat University.

I have no doubt that students, teachers and others interested in the study of the Sāṁkhya system of philosophy will benefit much from this work.

Gujarat University
Ahmedabad-9
16th March 1973

**K. C. Parikh**
University Registrar

# Preface

A palm-leaf manuscript of this hitherto unpublished vṛtti ($V_2$) on the Sāṁkhya Kārikā is preserved in the Jesalmere Grantha Bhaṇḍāra. An account of it is furnished by श्री जेसलमेरुदुर्गस्थ जैन ताडपत्रीय ग्रंथभण्डार सूचीपत्र (Catalogue of the Palm-leaf Manuscripts in the Jaina Grantha Bhaṇḍāra of Jesalmere) as follows :

क्रमाङ्क ३९३; पत्र–८९ [ Leaves–89 ]; भाषा–संस्कृत; ले. सं. ११७६ [ Copied in Saṁvat 1176 ]; संहनन–श्रेष्ठ; दशा–श्रेष्ठ; ल. प. ( Length and width )–१२३/४″ × १३/४″ ; ग्रंथमान—१३०० श्लोक.

Leaves 57, 58, 60–63, 66–74, 76-79 are missing. [Fragments of leaves 60 and 70 are preserved, and I have given in the text whatever is found therein.]

This edition is prepared from a photo-enlargement of a microfilm in the L. D. Institute of Indology, Ahmedabad, of this single manuscript. The writing before ०वात् ( the final portion of kā. 1) is lost as the leaf (१) is broken here. A brief namaskāra and the portion of kā. 1 before ०वात् seem to have been lost (–about 38 letters). The colophon is as follows : सांख्यवृत्तिः समाप्ता ॥ छ ॥ ग्रंथाग्रं ग्रन्थमानेन श्लोक १३०० मङ्गलमहाश्री । संवत् ११७६ ॥

As a rule there are four to five lines to either side of the leaf (–though some leaves have even two or three lines–), and about 60–65 letters to a line. The writing is on the whole quite clear and legible. The kārikās are not numbered. At places the kārikā is not given and we have only the commentary. The scribe writes ऋ for रि and vice versa. The final of some case-affixes, e.g. त् of आत्, is often omitted. At some places we find an anusvāra where it is not required, and at others it is omitted. The visarga is omitted at a number of

places. च and इति are at times not found, or are used at the wrong place; at some places they even seem to be superfluous. Sometimes letters or words are found unnecessarily repeated. These are minor errors common to most copyists and hardly deserve any mention. At places some words seem to have been omitted, but can mostly be supplied with a reasonable degree of confidence on the strength of the other commentaries, especially $V_1$ edited by me, and Gauḍapāda's Bhāṣya on the Sāṁkhya Kārikā. The scribe seems to have slurred over parts of the text because his eye was distracted by the same word occurring in two successive lines. On the whole the manuscript has been well copied and carefully preserved, though it is unfortunate that a number of leaves of such an important manuscript are missing.

I may mention for the reader's information that I have used the abbreviation '$V_2$' for this vṛtti for this reason only that of the two single manuscripts of the two hitherto unpublished vṛttis that I edited, I took up this one ($V_2$) after I had done some preliminary work on the other one, which I call $V_1$ and all the leaves of which are preserved.

The name of the author of the vṛtti is not found mentioned, but on the strength of a comparative study of the commentaries—$V_2$, $V_1$, Yuktidīpikā, Gauḍapāda-Bhāṣya, Jayamaṅgalā, Tattvakaumudī and 'Māṭhara-Vṛtti,' I have come to the conclusion that this is the earliest of the extant commentaries on the Sāṁkhya Kārikā, and that the authors of $V_1$, Yuktidīpikā and Gauḍapāda-Bhāṣya are indebted to it. Moreover, of all the extant commentaries this has the fairest claim to being regarded



as the original on which Paramārtha's Version is based. I have discussed some important points and parallelisms in the Notes, but have discussed at length the problems of the text of the Sāṁkhya Kārikā, the chronological order of the commentaries and the like in a separate Study—'The Commentaries of the Sāṁkhya Kārikā—A Study'. I have also therein attempted a comparative study of the contents of 'Māṭhara-Vṛtti,' Gauḍapāda-Bhāṣya, $V_2$, $V_1$ and Paramārtha's Version as claims have been put forth in favour of 'Māṭhara-Vṛtti' and Gauḍapāda-Bhāṣya being the original of the Chinese Version, and a similar claim can be made in favour of $V_2$ and $V_1$ also, the latter being very much like what is known as Māṭhara-Vṛtti. The comparative study will enable the reader to judge for himself. As mentioned above, of all the commentaries, $V_2$ is, in my view, the closest to the Chinese Version. The two are found to be different at places, but this can be accounted for as shown by me. Anyway, $V_2$ or a commentary very much like it, if it at all existed, must have been the original on which Paramārtha's Version was based, but certainly not $V_1$ or 'Māṭhara-Vṛtti' or Gauḍapāda-Bhāṣya.

The table, at the end of the 'Study', showing the different readings in the kārikā-text as accepted by the several commentaries, will enable the reader to see for himself that the kārikā-text in $V_2$ seems to be the original one, and the later variants, if any, are at times based on the expressions used in $V_2$ in the course of the exposition of the kārikā concerned, or are a result of attempts to improve upon the text as found in $V_2$. I have even a feeling that Īśvarakṛṣṇa himself might have been the author of this $V_2$, which would then be a svopajña-

vṛtti. But I have hardly any evidence to substantiate this. I hope scholars will be inspired to investigate into this.

We find the first 71 kārikās commented upon in $V_2$, while $V_1$ and 'Māṭhara-vṛtti' have 73 kārikās. Kā. 72 of $V_1$ is known to all the later commentators, though Gauḍapāda comments on kārikās 1-69 only. Paramārtha's Version refers to it as a verse composed by an 'intelligent man of this (school)'. In my view, kārikās 1-71(-the last one serving as a concluding stanza-) constitute the original text of the Sāṁkhya-saptati, and kārikās 72 and 73 are the composition of the author of $V_1$. I have discussed this in my 'Study'. My editions of $V_2$ and $V_1$ and the 'Study' are meant to supplement each other, though some points may be found discussed in two or all of them.

The emendation suggested is given in round brackets ( ) after the incorrect letter or word or words as the case may be, and if something is required to be supplied that is put within rectangular brackets [ ].

I shall feel very happy if my work stimulatess further discussion among scholars.

8-10-1971 **E. A. Solomon**

* * *

I am glad in having this opportunity to express my sense of gratitude to the authorities of the Gujarat University for deciding to publish this work.

I am also thankful to the Manager of the Ramanand Printing Press and all his colleagues for the promptness they have shown in seeing this book through the press.

25-3-1973 **E. A. Solomon**

## Abbreviations

$V_2$—The vṛtti published here.

$V_1$—Another vṛtti edited by me.

M—Māṭhara-Vṛtti (Chowkhamba Sanskrit Series, 1922).

G—Gauḍapāda-Bhāṣya (Chowkhamba Sanskrit Series, 1963).

Y—Yuktidīpikā (Calcutta Sanskrit Series, 1938).

J—Jayamaṅgalā (Calcutta Oriental Series, 1926).

T—Tattvakaumudī (Poona Oriental Series, 1934).

P—Paramārtha's Chinese Version

(The Sāṁkhya Kārikā-Studied in the light of its Chinese Version.

Translation into English by S.S. Suryanarayanan from M. Takakusu's translation into French—Madras, 1931).

# सांख्यवृत्तिः



[Leaf १ब]



[Leaf ८९]

## CONTENTS


| | Pages |
|---|---|
| Foreword | 3 |
| Preface | 5–8 |
| Abbreviations | 9 |
| Text of $V_2$ | १–६८ |
| Notes | ६९–१०८ |
| Index of kārikās | १०९–१११ |
| Errata | १११ |

# सांख्यवृत्तिः [ $V_2$ ]

## [ सांख्यसप्ततिका वृत्तिसहिता ]

**[१ब] [दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभा]वात् ॥ [१]**

अस्यार्याः (अस्या आर्यायाः) उपोदघात[:] इत्यत्रोच्य ते— ब भू व कपिलो* नाम भगवान् महर्षिः । तस्योत्पन्नशरीरः ( तस्योत्पन्नं शरीरम् ? ) । तस्यो-त्पद्यमानस्य अ(स)काशाच्चत्वारो भावा:+ सहोत्पना:—धर्म्मो ज्ञानं विराग-(वैराग्य)मैश्वर्यमिति । तेनात्मगतेन ज्ञानेन स भगवान्नि(नि)दं जगदन्धे तमसि वर्त्तमानं दन(द)र्श । तद(दा) कारुण्यादु(कारुण्यमु)त्पन्नमहो खल्विदं जगदन्धे तनमसि(तमसि) वर्त्तते संसारपारंपर्येणेति । उत्पन्नकारुण्यः ब्राह्मणविशेषं वर्षसहस्त्रयायि(जि)नमनु(न्त)र्हितो गत्वोवाच—"भो आसुरे रमसे गृहस्थधर्म्मो(र्म्मेऽ)स्मि[न्]" । स समुनुवाच (समुवाच or तमु-वाच) अ(आ)सुरिः—"रमेः(मे) भोः" । स एवमुक्तो निर्ज्जगाम । भूयो वर्षसहस्त्रे पूर्णे प्रत्यागम्य स तमुवाच—"भो आसुरे रमसे गृहस्थधर्म्मे" इति । तं प्रत्युवाचा-सुरिः "रमे भोः" । स भगवान् ततो निर्ज्जगाम । भूयो[ऽपि] तृतीये वर्षसहस्त्रे पूर्ण्णे प्रत्यागम्य तमुवाच—"आसुरे रमसे गृहस्थधर्म्मे" इति । तमुवाच भगवन्तं कपिलमासुरिः "न रमोः (न रमे भोः)" । त(अ)थोक्तो भगवता "उत्सहसे ब्रह्मचर्यं कर्त्तुम्" इति । तं प्रत्युवाचासुरिः "बाढमित्थम्" इति । स ए[२अ]वं गृ[ह]स्थधर्म्मं परित्यज्य कपिलस्य शिष्यो बभूव ।

तत्र कश्चिद् ब्रूयात्कुत(तोऽ)स्य जिज्ञासा समुत्पन्ना आसुरिसगोत्रस्य ब्राह्मणविशेषस्य यया जिज्ञासया गृहस्थधर्म्मं परित्यज्या(ज्य) गुरुमभिगत इति ।

---

*The portion of the leaf having the underlined letters is broken at the end of the first line.

+ Or could it be प्रकाशाश्चत्वारो भावाः ?

इत्यत्रोच्यते–आध्यात्मिक(का)[दि]दुःखत्रयाभिघाताज्जिज्ञासा । दुःखानां त्रयं दुःखत्रयम् । दुःखत्रयेणाभिघातः दुःखत्रयाभिघातः तस्मा[द्] **दुःखत्रयाभिघाताज्जिज्ञासा,** ज्ञातुमिच्छा जिज्ञासा समुत्पन्नेत्यर्थः । जिज्ञासा–किं परं किमपरं किं याथातथ्यं किं नि(निः)श्रेयसं किं कृत्वा कुतःकृत्य(कृतकृत्यः) स्यामिति गुरुमभिगतः । अथ कानि तानि दुःखानि यैरभिहतः गु[रु]मभिगत इत्यत्रोच्यते–आध्यात्मिकम्, आधिभौतिकम, आधिदैविकं चेति त्रीणि दुःखानि ।

तत्राध्यात्मिकं द्विविधं शारीरं मानसं चेति । तत्र शारीरं नाम वातपित्तश्लेष्मा(ष्म)णां वैषम्यनिमित्तेन य[द्] दुःखमुत्पद्यते तदाध्यात्मिकमित्यभिधीयते । अमा(आ ना)भेर्व्वातस्य, आ हृदयात्पित्तस्य, ऊर्ध्वं श्लेष्मण इति त्रयाणां त्रीणि स्थानानि भवन्ति । तत्र कदाचिद्वायुरुत्कटीभूत्वा पित्तश्लेष्मणावा(०ष्माणाव)-[२ब]भिभवति तदा वायुनिमित्ता दोषा उत्पद्यन्ते तद्यथा शिरोरोगाक्षिरोगसु(मु ?)खरोगभगन्दरगुदावर्त्तजलोदरप्लीहवातगुल्मकासखा(श्वा)सातीसारप्रभृतयो व्याधयः उत्पद्यन्ते । यदा पित्तरु(मु)त्कटीभूत्वा वातं[श्लेष्माणं] चाभिभवति तदा पित्तनिमित्ता दोषा उत्पद्यन्ते । यदा श्लेष्म(ष्मा) उत्कटीभूत्वा वातं [पित्तं] चाभिभवति तदा श्लेष्मनिमित्ता दोषा उत्पद्यन्ते । एतच्छ(च्छा)रीरमित्युच्यते । मानसदुःखं व्या[ख्या]स्यामः । तत् त्रिविधम्–प्रियविप्रयोगं(गः), अप्रियसंप्रयोग ईप्सितस्य चालाभः । संकल्पयन् (संकल्पयतः ?) मानसं दुःखमुत्पद्यते । एवमेव द्विविधमाध्यात्मिकं शारीरं दुःखं व्याख्यातम् । अ(आ)धिभौतिकं व्याख्यास्यामः । मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तं यद्दुःखमुत्पद्यते [तदाधिभौतिकमित्यभिधीयते ।] आधिदैविकं यथा शीतोष्णवातवर्षासत्य(०र्षाशन्य)वश्यावेशनिमित्तं यद्दुःखमुत्पद्यते तद(दा)धिदैविकमित्यभिधीयते । एवमेतानि त्रीणि दुःखानि आध्यात्मिकमाधिभौतिकमाधिदैविकमित्यभिधीयते(न्ते) । एतैस्त्रिभिर्दुःखैरभिहतस्य [३अ] आसुरिसगोत्रस्य ब्राह्मणवि[शे]षस्य जिज्ञासा उत्पन्ना–किं परं किमपरं किं य(या)थातथ्यं किं नि(निः)श्रेयसं किं कृत्वा कृतथा स्यादिति (कृतार्थः स्यामिति) ।



अत्राह–या जिज्ञासा त्रिभिदुः(र्दुः)खैरभिहत[स्य] आसुरिसगोत्रब्राह्मणविशेषस्योत्पन्ना सा किंहै(हे)तुकी । तेषा तेषा*(तेषा)मपघातः(तकः) । तच्छब्देन दुःखान्युपसंगृह्यन्ते । तस्मिन् **तदपघातके हेतौ** इयं जिज्ञासा समुत्पन्ना । किं खल्विया(मा)नि दुःखानि शरीरस्य, आहोस्विच्छरीरव्यतिरिक्तोऽस्तीति(०ऽस्ति) कश्चिदन्यः पुरुषः यस्य दुःखानि, एषां च दुःखानां कश्चिदस्ति उपायः येन दुःखानि न स्युरिति । यद्युपायोऽस्तीति उपायान्तरमा[स्था]स्यामोति येन दुःखानि न भविष्यन्ति । अवा(अथ) नास्त्युपायः, तूर्ष्णीं दुःखान्यनुभविष्यामि । नात्र इदं स्या+[३ब]दित्येवं दुःखानि(भि)भूतस्यासुरिसगोत्रस्य ब्राह्मणविशेषस्य तदव(प)घातक(के) हेतौ जिज्ञासा समुत्पन्नेति । स उत्पन्नजिज्ञासः कपिलं भगवन्तमभिगतः अयमुपायं करिष्यतीति येन दुःखानि न भविष्यन्ति ।

अत्राह–दुःखेभ्य एव जिज्ञासा समुत्पन्ना दुःखानामेव [नि]से(षे)धं (निषेधं) कथं करिष्यतीति । न हि मातुरुत्पन्न[:] पुरुषः मातुरेव वधं करोतीति । अत्रोच्यते–इह हि लोके तस्मादेवोत्पन्नं तस्ये(स्यै)व वधं करोतीति । तद्यथा राजपुत्रः राज्ञः समुत्पन्नः राज्ञ एव वधं करोतीति ।

तत्र कश्चिद् ब्रूयात्–**दृष्टे साऽपार्था चेत्** । इह लोके सर्व्वप्रत्यक्षः दुःखापघातको हेतुर्दृष्टः श(शा)रीरस्य तावत् अष्टाङ्गः आयुर्व्वेदः, तद्यथा कायशल्यः सलाको (कायशल्यशलाका)विषो[४अ]न्मा[द]क्लीबजराकुमारविचिकित्सितानि । मानसस्येष्टा(ष्ट)विषयसेवेति । अ(आ)धिभौतिकस्य रक्षाविधिः । आधिदैविकस्य गुप्तस्थानमेव शान्तिकर्म्मं चेत् (०कर्म्म च) । एवं दृष्टे दुःखप्रतीकारे हेतौ इयं जिज्ञासा अपार्थिकेति ।

उच्यते । न अपार्थिका जिज्ञासा । कस्मात् । **नैका[न्ता]त्यन्ततोऽभावात्** ।

* One तेषा is superfluous.
* इदं स्यात् is unnecessarily repeated in the manuscript.

किं नु वयं ब्रूमः। अष्टाङ्गस्यायुर्व्वेदस्य द्वे(द्वौ) दोषौ—एकान्तस्याभावः— — — —+ [अन्त्याभाव ?](अत्यन्ताभाव)श्च। एकान्ताभावस्तावत्, यथा शास्त्रोक्तेन विधिना क्रियमाणेऽपि सिद्धिर्भ्भवति वा न वा। अन्त्या(अत्यन्ता)भावः—कृतेऽपि भूयो भविष्यत्येव। तस्मात् एवंविधे हेतौ नास्य शिष्यस्य परिधीयते परितोषः। एवं सर्व्वे दुःखापघातको(का) हेतवो दृष्टाः।

प्रत्याह—यद्येवं दुःखापघातक[:]समर्थो (or दुःखापघातसमर्थो) हेतुर्भवतीति। अस्त्यन्यतो हेतुर्यत्रैकान्तिकं फलं श्रूयते। एवं ह्याह—

"अपाम सा(सो)ममृता अभूमागन्म ज्योति[र]विदाम देवाः(वान्)।
किं नूनमकृणवद्दातिरमृतं मर्त्यस्येति॥
(किं नूनमस्मानकृणवदरातिः किमु धूर्त्तिरमृत मर्त्यस्य॥ इति)
[ऋग्वेद ८. ४८.३, अथर्वशिरस्, ३]

आत्यन्तिकं फलं [४ब] श्रूयते। अत्रा(त्र) व्याख्यानम्—कदाचिदिन्द्रं देवा उपस्थितानां(उपस्थिताः, तान्) देवादि(नि)न्द्र उवाच। भोः देवाः देवत्वादन्य[द]पि सुखतरमस्तीति। ते एकान्तें(न्ते) स(सं)चिन्त्य अभ्यागम्य मू(ऊ)चुः—नास्ति देवत्वादन्यं(न्यत्) सुखमिति। तेनोक्ता[:] केन हेतुनेति ति(ते) प्रत्यूचूः—अनेन हेतुना यस्मात् 'अपाम सोमम्' इति। 'पा पाने' धातुः, तस्य '[अ]पाम' इति भवति। पीतवन्तः स(स्मः ?) सोममित्यर्थः। तत इन्द्रेणोक्ता[:] किं वो भविष्यतीति। ततस्तैरुक्तम्—'अमृता अभूमः(म)'। 'भू सत्तायाम्' धातुः, तस्य 'अभूम' इति। ते ऊचुः यस्मादस्माकिं(भिः) सोमरसः पीतः तेनामृता अमृता* अभूमर (अभूम)। 'आगम (अगन्म) ज्योतिः'। अगम(न्म) 'गम्लृ-सृप्लि(प्लृ) गतौ' तस्यात्मनेति (तस्य 'अगन्म' इति) भवति। ज्योतिरिति

+ Here in the manuscript there is blank space for four letters – – – – They can be अन्त्याभाव which the scribe writes for अत्यन्ताभाव.

* One अमृता is superfluous.



स्वर्गस्य प्रमाणम्। सोमं पीत्वा अमृता अभूमः(म) स्वर्गा(र्गं) प्राप्तो(प्ताः) स्म इति। किं चास्य(न्य)[द्], 'अविदाम देवान्'। 'विदु(द) ज्ञाने' तस्य 'अविदाम' इति। भव अस्यं(भवन्त्यस्मिन्) स्वर्गे इये(य)न्तो देवाति(देवा इति) विद्मः। किं नूनमस्मान्पुनः(नर्) दु[:]खं भविष्यतीति। तस्मात् तूपोवन्तो (उपायवन्तो ?) व्या[५अ]धयः आध्यात्मिकाधिभौतिकाधिदैविकास्ते किं करिष्यती(न्ती)ति। [अ]रातिरित्युच्यते मृत्युः। सोऽस्मादि(नि)दानीं [किं] करिष्यतीति। किं चान्यत्। किम(किमु) धूर्त्तिरित्युच्यते जरा। एवं यः सोमं पिबति तस्य व्याधयो मृत्युर्ज्जरा वा किं करिष्यतीति। तस्मादाह— किं तत्प्रव्रज्यया न्प्र(प्र)योजनमिति। सांख्यज्ञानेन वा। वेदोक्तं करिष्याम इति। वेदा[दे]वाभ्यधिकं फलं श्रूयते। पशुधवेन(०वधेन) सर्व्वान् लोकान् जयतीति ऐकान्तिकं फलं श्रूयते। तद्विहितेषु दुःखप्रतीकारहेतुषु अपार्थिकेयं जिज्ञासा। एवं वेदवादिनो * [क्ते] आचार्यो ब्रवीति सप्ततिकाकर्ता च।

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।**
**तद्विपरीत(तः) श्रेयान् व्यक्ताव्यक्तज्ञान(०क्तज्ञ)विज्ञाना[त्]॥२॥**

तत्र दृष्टेन तुल्यं **दृष्टं(ष्ट)वत्**। कोऽसो(सौ) अ(आ)**नुश्रविकः**। अनुश्रूयते परंपर्या(परंपरया) इत्यानुश्रविकः। स च यथाष्टाङ्गो(ङ्ग) आयुर्व्वेदः एकान्ताभावात् अत्यन्ताभावाच्च दुःखापघातक[:] समर्थो (or दुःखापघातसमर्थो) न भवतीत्युक्तं तथा न देवे(वेदो) भवतोति। कस्मात्। **स ह्यविशुद्धिक्षयातिश[५ब]ययुक्तः**। अविशुद्धि[श्च] क्षयश्च अतिशयश्च ते इमेऽविशुद्धिक्षयातिशयाः तैरविशुद्धिक्षयातिशयैर्युक्तो हेतुः वेदविहितः स भवति अविशुद्धिक्रि(क्ष)यातिशययुक्तः। अविशुद्धियुक्तस्तावत्—

षट् शतानि [नि]युज्यन्ते पशूनां मध्यमेऽहनि।
अश्वमेधस्य वचनान्यू(दू)नानि पशुभिस्त्रिभिः॥

* Blank space for one letter (–). It could be वेदवादिनोक्ते.

इत्येवंलक्षणाऽविशुद्धिः । किञ्चान्यत्—

न तस्य युक्तमनृतं हिनस्ति न स्त्रीषु राजेन्द्र विवाहकाले + ।
प्राणात्यये सर्व्वधनापहारे पंचानृतान्याहुरपातकानि ॥

इत्येवमादिना पापकर्म्मणा मिश्रीभावात् अविशुद्धियुक्तः वेदविधिः । क्षययुक्तः—

बहूनि द्र(बहूनीन्द्र) सहस्राणि दैतेयानां युगे युगे ।
कालि(ले)न समतीतानि कालो हि दुररि(ति)क्रमः ॥

इत्येवमिन्द्रादीनां पतनं दृष्ट्वा यजमानस्य कर्म्मक्षये पतनं दृष्टम् । अतिशययुक्तं(क्तः) खल्वपि—इह आढ्यं दृष्ट्वा दरिद्रस्य दुःखमुत्पद्यते सुरूपं दृष्ट्वा विरूपस्य प्राज्ञं दृष्ट्वा मूर्खस्य । तत्( तद्वत् ) वेदेषु एको [य]जमानः एकया अप्सरसया-(अप्सरसा) एके[६अ]न विमानेन विचरति । अपरे(रो) यजमानः अप्सरस(सां) सहस्रेण परिवृतस्तस्योपरिष्टाद् विचरति । तं दृष्ट्वा इतरस्यैकविमानस्य महद् दुःखमुत्पद्यते मे ना यं (मत्तोऽयं) विशिष्ट इति । एवमेतैरविशुद्धिक्षयातिशयैस्त्रिभिर्दोषैः युक्तो वेदः । तत्र यदुक्तं करिष्यामीति विदोक्तं(वेदोक्तं करिष्यामीति) तन्मिथ्या ।

किं तर्हि श्रेयानिति अत्रोच्यते **तद्विपरीतः** । ताभ्यां विपरीतस्तद्विपरोतः, दृष्टानुश्रविकाभ्यां विपरोत इत्यर्थः । तद्विपरोतः इति एकान्तिकात्यन्तिकविशुद्धः (ऐकान्तिकः आत्यन्तिकः विशुद्धः) अक्षय[ः] निरतिशय इत्यर्थः । अत्राह—यः श्रेयोहे[६ब]तुः स कथं प्राप्यत इति । अत्रोच्यते—**व्यक्ताव्यक्त[ज्ञ]विज्ञानात्** । अत्र समासः व्यक्तं च अव्यक्तं च [ज्ञ]श्च व्यक्तज्ञाः (व्यक्ताव्यक्तज्ञाः) तेषां व्यक्ताव्यक्तविज्ञानं ज्ञानं व्यक्तविज्ञानं तस्माद् व्यक्तज्ञो विज्ञानं ( तेषां व्यक्तव्यक्तज्ञानां विज्ञानं व्यक्ताव्यक्तज्ञविज्ञानं तस्मात् व्यक्ताव्यक्तज्ञविज्ञानात् )। स हेतुः प्राप्यत इति वाक्यशेषः । अत्राप्युक्तं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येतद्व्यक्ता(क्तम्), [अव्यक्तं] प्रधानं, ज्ञः पुरुषः एवमेतानि पञ्चविंशतितत्त्वानि पनि(रि)समाप्तानि ।

\+ Should this not be ०राजन्न विवाहकाले ?



अपि चोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥

अत्राह–एषां व्यक्ता[दी]नां कः प्रविभा[७अ]गः । अत्रोच्यते चतुर्व्विधः प्रविभागः तद्यथा—

**मूलप्रकृतिरविकृतिर्म्महदाद्या[ः] प्रकृतिविकृतयः सप्त ।**
**षा(षो)डशकस्तु विकारो न प्रकृतिर्न्न विकृतिः पुरुषः ॥ ३ ॥**

तत्र **मूलप्रकृति**रिति प्रधानमधिकुरुते । प्रकरणा[त्] प्रकृतिः । सप्तानां प्रकृतीनां मूलमिति मूलप्रकृतिरिति×रित्युच्यते (०प्रकृतिरित्युच्यते)। बुद्धिमुत्पादयतीति प्रकृतिः, [न] अन्यस्मादुत्पद्यत इति तस्माद**विकृतिः** । **प्रकृतिविकृतयः सप्त**—बुद्धिरहङ्कारः पञ्चतन्मात्राणि एताः सप्त प्रकृतिविकृतयः । बुद्धिः प्रधानादुत्पद्यन्ते(ते) तस्माद्विकृतिः अहङ्कारमुत्पादयति तस्मात् प्रकृतिः । [अहङ्कारः बुद्ध्या उत्पद्यते तस्माद्विकृतिः, पञ्चतन्मात्राणि एकादशेन्द्रियाणि च उत्पादयति तस्मात् प्रकृतिः ।] शब्दनात्र(शब्दतन्मात्रम् ) अहङ्कारादुत्पद्यते तस्माद्विकृतिः [आकाशमुत्पादयति तस्मात् प्रकृतिः । स्पर्शतन्मात्रमहङ्कारादुत्पद्यते तस्माद्विकृतिः] वायुरु(मु)त्पादयति तस्मात्प्रकृति[ः] । रूपतन्मात्रमहङ्कारादुत्पद्यते [७ब] तस्माद्विकृतिः, अग्निमुत्पादयति तस्मात्प्रकृति[ः] । रसतन्मात्रमत्रं(रसतन्मात्रम)हङ्कारादुत्पद्यते तस्माद्विकृतिः, अप उत्पादयति तस्मात्प्रकृतिः । गन्धतन्मात्र[म्] अहङ्कारादुत्पद्यते तस्माद्विकृतिः, पृथिवीमुत्पादयति तस्मात्प्रकृतिः । एवमेताः प्रकृतयोः (प्रकृतिविकृतयः) भवन्ति । षोडशकः एव विकृतिः (षोडशकः विकृतिः एव) । एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येष षोडशको गणः विकृतिरित्युच्यते । 'तु' शब्दोऽत्रावधारणार्थम्, उत्पद्यते मु(नो)त्पादयतोति एतदवधारयति । **न प्रकृतिर्न्न विकृतिः पुरुषः**, न प्रकृति अविकृति (न प्रकृतिः न विकृतिः ? ), न प्रकृतिषु प्रकृति[ः] न विकृतिषु विकृति[रि]ति अन्य एव

× One रिति is superfluous.

पुरुषः । एषामं यद् (एषामयं) व्यक्ताव्यक्तज्ञानां चतुर्व्विधः प्रविभाग[ः] ।

अत्राह—एषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां केन [८अ] प्रमाणेन सिद्धिर्म्भवति । अत्रोच्यते ॥छ॥

**दृष्टमनुमानमाप्तवचनं च सर्व्वप्रमाणसिद्धत्वात् ।**
**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धं(द्धिः) प्रमाणादि(द्धि) ॥४॥**

श्रोत्रं त्वक् चक्षुर्ज्जिह्वा घ्राणमिति बुद्धीन्द्रियाणि । शब्दस्पर्शरसरूप(०रूप-रस)गन्धाः पञ्चेन्द्रियार्थाः । श्रोत्रेण शब्दो गृह्यते । त्वच(चा) स्पर्शः । चक्षुषां(षा) रूपमं (रूपम्), जिह्वया रसः, घ्राणेन गन्धो गृह्यत इति पञ्चभिरिन्द्रियैः पञ्चेन्द्रियार्था गृह्यन्ते । एतद् दृष्टमित्युच्यते प्रमाणम् । प्रत्यक्षेण योऽर्थो न गृह्यते सोऽनुमानेन साध्यो यथा धूमं दृष्ट्वाग्निं साधयति । एवमनुमानं नाम प्रमाणम् । प्रत्यक्षेणानुमानेन च योऽर्थो न साध्यते स आप्तवचनात् सिद्धः । यथा इन्द्रो देवराजा, उत्तराः कुरवः, स्वर्गेऽप्सर[सः] सन्ति इति । नैते प्रत्यक्षसाध्या नानुमानसाध्या आप्तानां व[८ब]चनं श्रुत्वा प्रमाणीक्रियन्ते । अपि चोक्तं—

आगमा ह्याप्तवचनम् आप्तिं दोषक्षयं विदुः ।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात् ॥

एवमेतानि आप्तवचना[न्ता]नि त्रीणि प्रमाणानि न्यु(उ)द्दिष्टानि । एतेषु सिद्धेषु सर्व्वप्रमाणान्यपि सिद्धानि भवन्ति । तद्यथा, अर्थापत्तिः संभवः अभावः प्रतिभावः दैतह्यां(प्रतिभावदैतिह्यम्) अपस्यश्चेष्टेति (औपम्यं चेष्टेति) । तत्रार्थापत्तिर्नाम यथा दिवा न भुंक्ते इत्युक्ते देवदत्तः (देवदत्तः इत्युक्ते) अर्थादापन्नां(न्नं) रात्रौ भुंक्त इति । एषार्थापत्तिः । संभवः—प्रस्थ इत्युक्ते संभवत्यर्धप्रस्थो ह्यत्रैव । एष संभवः । अभावः—अस्मा[द्] देशादन्यं देशं गत्वा देवदत्तः शरत्काले शुष्कान् व्रीहीन् पश्यति । तान् शुष्कान् व्रीहीन् दृष्ट्वा फलकाले वृष्टेरभावं साधयति । नूनमस्मिन् देशे न वृष्टो देव इति । एवमभावः । प्रति[९अ]भावद् यथा—

दक्षिणेन तु विन्ध्यस्य सह्यस्यैवोत्तरेण तु ।
पृथिव्यां रमणीयोऽयम् अत्यन्तं तदनन्तरम् ॥



एषा प्रतिभा (?) नाम प्रमाणान्तरम् । ऐतिह्यं नाम वेदश्रुतिः(तेः) आद्या अविपरीता श्रुतिः(स्मृतिः ?) [अ]सावैतिह्यमित्युच्यते, धर्म्मशास्त्राणीत्यर्थः । अपि चात्र श्लोकः—

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी ।
गुरौ याज्या(ज्य)श्च शिष्यश्च स्तेनो राजन्(नि) किल्बिषम् ॥

अ(औ)पम्यं नाम यथा गौस्तथा गवय इति । चेष्टा नाम यथा मूलक(मूक)स्य क्षुधितस्य हस्तकर्म्मणा क्षुत् साध्यते । एवम(मे)तानि सप्त प्रमाणानि त्रिष्वेव प्रमाणेष्वन्तर्भूतानि । अर्थापत्तिः [संभवः] अभावः प्रतिभा चेष्टेति अनुमाने, ऐतिह्यौपम्यं (ऐतिह्यमौपम्यं) चाप्तवचनेऽन्तर्हितम् । तस्मात् त्रिविधं प्रमाणमिष्टं केषामाचार्याणाम् (एषा० ?) ।

अत्राह—तेन द्विविधेन प्रमाणेन किं साध्यते । अत्रोच्यते—प्रमेयसिद्धिः । प्रमाणं च प्रमाणे च प्रमाणानि सरूपाणामेकशेषः एकविभक्तौ जात्याख्यात्वतः (कृता) । यस्मात् प्रमाणा[९ब]त्प्रमेयं सिध्यति प्रमेयेऽपि जात्याख्या कृता । प्रमेयं च प्रमेयः (प्रमेये) [च प्रमेयाणि] सरूपाणामेकशेष एव(क)विभक्तौ । व्यक्तं च प्रमेयमव्यक्तं च ज्ञश्च प्रमेयं(ये) तदिदं प्रमेयम् । एवमस्यायं भेदः । प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति । एवमेतानि पञ्चविंशतितत्त्वानि प्रमे[य]मित्युच्यते(न्ते) । किञ्चित् प्र[त्य]क्षेण साध्यते किञ्चिदनुमानेन किञ्चिदागमेनेति । तस्मादुक्तमेतत्—**प्रमेयसिद्धिः प्रमाणसिद्धिः (प्रमेयसिद्धिः प्रमाणाद्धि)** ।

अत्राह—त्रिविधं प्रमाणमुक्तम् । तस्य प्रमाणस्य द्वि(त्रि)विधस्य किं लक्षणम् इति । उच्यते ॥छ॥

**प्रतिविषयाध्यवसायो दृष्टं द्वि(त्रि)विधमनुमानमाख्यात[म्] ।**
**तल्लिङ्गलिङ्गिपूर्व्वकमा[प्तश्रुतिरा]प्तवचनं च ॥५॥**

**प्रतिविषयाध्यवसायः दृष्ट[मि]त्युच्यते** । दृष्टं नामं(म) प्रतिरूपादिषु विषय(ये)षु पञ्चसु चक्षुरादीनामिन्द्रियाणां पञ्चानामेष योऽध्यवसायो निश्चयः,

एवमिदं नान्यथेति । एतद् दृष्टस्य लक्षणम् । अनुमानस्येदानीं वक्ष्यामः । **[१०अ]** अत्रोच्यते–**त्रिविधमनुमानमाख्यातम्** । आख्यातं कथितमित्यर्थः । तच्चानुमानं पूर्व्ववत्, शेषवत्, सामान्यवच्चेति (सामान्यतोदृष्टं चेति) । तत्र पूर्व्ववदिति पूर्व्वमनुमानं, यथा प्रावृट्काले मेघमुत्थितं दृष्ट्वा भविष्यति वृष्टिरिति । त(य)स्मात् पूर्व्वं मेघः पश्चाद् वृष्टिरिति मेघेन पूर्व्वोत्थितेन [वृष्टिः] साध्यते । एतत्पूर्व्व[व]दनुमानं व्याख्यातम् । शेषवद्वक्ष्यामः । शेषोऽर्थोऽस्यास्तीति शेषवत् । यथा पः (यथा ?) समुद्रोदकबिन्दुं प्राश्य शेषस्यापि लवणताऽनुमीयते । एतच्छेषवदनुमानम् । सामान्यते(तो)दृष्टमनुमानं वक्ष्यामः । इह नु नगरे आम्रं पुष्पितं दृ[१०ब]ष्ट्वा वसन्तकाले नूनं कृत्स्नायामपि वसुन्धरायां पुष्पिता आम्रा इति । एतत् सामान्यतोदृष्टम् । अनुमानं **लिं[गलिङ्गि] पूर्व्वकम्** । यथा लिङ्गपूर्व्वकम्, त्रिदण्डं दृष्ट्वा लिङ्गं, लिङ्गिनं परिव्राजकं साधयति, तस्येदं त्रिदण्डमिति । अथवा परिव्राजकं लिङ्गिनं दृष्ट्वा, त्रिदण्डं लिङ्गं साध्यते नूनमस्य त्रिदण्डमस्तीति । एतल्लिंगलिंगिपूर्व्वकमनुमानं चेति ।

लिंगलिंगिसंबन्धस्तु स्वस्वामि-प्रकृतिविकार-कार्यक(का)रण-मात्रात्रिका(मात्रामात्रिक ?)–प्रतिपत्ति (प्रतिद्वन्द्वि ?)–सहचर–निमित्तनैमित्तिकप्रभावैरिति । आप्तवचनस्य लक्षणमिति । अत्रोच्य[११अ]ते–**आप्तश्रुतिराप्तवचनं च** । अत्र आप्ता नामाचार्याः हरिहरहिरण्यगर्भादयः तेषामाप्तानां श्रुतिः वेद इत्यर्थः । मन्वादयो धर्म्मशास्त्रकाराः आप्ता[ः] तेषामाप्तानां वचनमाप्तवचनमिति ।

आ(अ)त्राह–कतमो(मे)नानुमानेन कतमेन प्रमाणेन कतमं(मत्) प्रमेयं सिध्यते इति । अत्रोच्यते ॥छ॥

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात् ।**
**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥६॥**

यदेतत् सामान्यतोदृष्ट[म]नुमानं पूर्व्वोक्तं तस्मादनुमानात् प्रधानपुरुषौ अतीन्द्रियौ साध्येते । कथम् । क(य)स्मात् महदादि लिङ्गं त्रिगुणमतः साध्यते नूनमस्ति प्रधानं त्रिगुणं यस्मादिदं त्रिगुणमेव महदादि लिङ्गमुत्पन्नमिति । एवं



तावत् प्रधानमनुमानतः सिद्ध[म्] इति । तथा पुरुषोऽप्यनुमानसाध्यः–नूनमस्ति पुरुषः यस्यार्थे प्रधानं महदादि लिङ्गमुत्पादयतीति । एवं प्रधानपुरुषौ म(अ)नुमानसाध्यौ । व्य[११ब]क्तं प्रत्यक्षसाध्यम् । प्रत्यक्षेणानुमानेन च योऽर्थो न साध्यते स आप्तवचनेन साध्यः यस्माद् ब्रवीति–**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्** । यो यत्रा(त्र) नियुक्तः कर्म्मणा च तुष्टः तेन तत्रोपदेशः क्रियते । इन्द्रो देवराजा, उत्तराः कुरवः इति । ते चाप्तवचनात् साध्येते इति ॥

अत्राह–प्रधानपुरुषौ नोपलभ्येतै(ते) इति । यच्च नोपलभ्यते लोके तन्नास्तीति । यथा द्वितीयमनोश्वरः(र)शिरः । प्रधानपुरुषौ [नोपलभ्येते] तस्मात्तावपि न स्त इति । तत्रोच्यते–यदुक्तं येऽर्थाः प्रत्यक्षतो नोपलभ्यन्ते ते न सन्तीति, तद्यथा असतां निरात्मकत्वात् अनुपलब्धिः । सतामर्थानां निमित्तादृष्टविधा[द्] अनुपलब्धिः । [अनुपलब्धेः] द्वैविध्यात् । इहानुपलब्धिर्द्विविधा सतामसतां च । असतां निरात्मकत्वात् अनुपलब्धिः । ससांतार्थानां (सतामर्थानां) निमित्तादष्टविधादनुपलब्धिः दृष्टा, यथा प्रधानो(नं) नोपलभ्यत इति । अत्रोच्यते ॥छ॥

**अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।**
**सौक्ष्म्याद्व्यवधानादभिभवा[१२अ]त्समानाभिहाराच्च ॥७॥**

इह सतोऽर्थस्या**तिदूरा**दनुपलब्धिर्दृष्टा, यथा विप्रकृष्टेऽध्वनि वर्त्तमानः शकुनिर्न्नोपलभ्यते । न (स ?) च यस्मान्नोपलभ्यते किमसौ नास्तीति । अ[ति]दूरान्नोपलभ्यते । अत्राह–यन्नात्ति(ति)दूरे त(त्) कस्मान्नोपलभ्यते । अत्रोच्यते–**सामीप्यात्** । यदा(था) देवदत्तः आत्मचक्षुःस्थं(स्थ)मञ्जनं नोपलभते; किं तन्नास्ति । अत्राह—यन्ना(ति)दूरे नातिसामीप्ये तत्कथं नोपलभ्यते । अत्रोच्यते—**इन्द्रियघाताद्** । यथा बधिरः शब्दं न शृणोति, अन्धो रूपन्नं (रूपं न) पश्यति, किं ते शब्दरूपे न स्युः (स्तः) । अत्राह–यस्य अनपहतमिन्द्रियं कस्मान्नोपलभते इति । अत्राह (अत्रोच्यते)–**मनोऽनवस्थानात्** । अनवस्थितमना हस्तिनं परिक्रामन्तं न पश्यति । अस्ति चासौ । वेक्ता(त्ता)रा

भवन्ति । व्यग्रमनुमा (व्यग्रमनसा ?) नावधारितमिति । यस्याव्यग्रं मनः स नित्यं स्वस्थः क[१२ब]स्मान्नोपलभति(ते) । अत्रोच्यते—**सौक्ष्म्यात्** । धूमोष्मनोहारा आकाशगता नोपलभ्यन्ते [किं] न सन्तीति । अत्राह—ये नातिसूक्ष्मास्ते कस्मान्नोपलभ्यन्ते । अत्रोच्यते—**व्यवधानात्** । कुड्येन घटादयो व्यपकृताः (व्यवहिताः ?) । ये चाव्यपकृताः (चाव्यवहिताः ?) ते कस्मान्नोपलभ्यन्ते । अत्रोच्यतेऽ[**भि**]**भवात्** । यथाऽऽदित्यप्रकाशैं(शैः or शे) ग्रहनक्षत्रचन्द्रताराणाम् अप्रकाशा (प्रकाशा ?) अभिभूतत्वान्नोपलभ्यन्ते । किं ते न सन्तीति । अत्राह—ये नाभिभूतास्ते कस्मान्नोपलभ्यन्त इति । अत्राह (अत्रोच्यते)—**समानाभिहाराच्च** । समानात् (समानाः) सदृशाद (सदृशा) इत्यर्थः । तेषां समभिहारो राशिः तस्मात् समानादीनां अमेत्वम् (माषादीनाममे[य]त्वम् ?) । एवं सतामर्थानामष्टविधा अनुपलब्धिः । असतां च चतुर्व्विधा । प्रागुत्पत्तेरभावात् यथा मृत्पिण्डे घटो नास्तीति उच्यते । अभावान्नोपलभ्यते । प्रध्वंस(सा)भावात् [१३अ] यथा मुद्गराभिघाते प्रध्वस्तो घटो [नोपल]भ्यते । इतरेतराभावाद् यथा गोत्वमश्वत्वे नास्ति अश्वत्वं वा गोत्वे गवि + । अत्यन्ताभावात् यथा द्वितीयमनीश्वरः(र)शिरः तृती[यो] बाहुः शशविषाण इति । एवमियं द्वादशविधा अनुपलब्धिर्दृष्टा; सतामर्थानामष्टविधा, असतां चतुर्व्विधा । तस्मात् सतोऽप्यर्थ[स्य] एभिरनुपलब्धिः ।

[१४अ] एक एव दोषः स्यात् । तत्र यदुक्तं येऽर्था यत्रये(यत्र)नोपलभ्यन्ते ते न सन्ति । अनुपलब्धिश्चाभावलक्षणम् । प्रधानपुरुषौ च नोपलभ्येते य(त)स्मात्तौ न स्त इति त(द)युक्तमिति । अत्राह—यथोद्दिष्टानां द्वादशानामनुपलब्धिहि(हे)तूनां कतमेन हेतुना प्रधानस्यानुपलब्धिरिति । अत्रोच्यते ॥छा॥

**सौक्ष्म्यात्तदनुपलब्धिर्न्नाभावात्कार्यतस्तदुपलब्धिः ।**
**महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च ॥८॥**

**सौक्ष्म्यात्तस्य** प्रधानस्यानुपलब्धिः । सूक्ष्मं हि प्रधानम् । कस्माद्, अदर्शन-

+ गवि is superfluous.



लक्षणत्वात् । आह—कथमेतद्गम्यते सौक्ष्म्यादेवानुपलब्धिर्न्नाभावादिति । अत्रोच्यते-सौक्ष्म्यादेवानुपलब्धिर्**न्नाभावादि**ति । कस्मात् **कार्यतस्तदुपलब्धिः** । कार्याति(द्धि) कारणानामुपलब्धिर्दृष्टा । विस्तीर्णविटपशाखं न्यग्रोधपादपं दृष्ट्वाऽनुमीयते अस्त्यसौ जननक्रियासमर्था न्यग्रोधव(धा)ना यस्याः अनुपलभ्य[१४ब]मानायाः अपीदं कार्यमुपलभ्यते । एवमिहाप्यस्ति प्रधानं सौक्ष्म्यादनुपलभ्यमानं कार्यदर्शनादनुमीयते न्यग्रोधव(धा)नावत् । जगतः क्रियासमर्थमेव प्रधानं यस्येदं कार्यमिति । अत्राह—किञ्च कार्यमिति यदुपलभ्य प्रधानमनुमीयत इति । अत्रोच्यते—**महदादि तच्च कार्यम्** । मह(हा)न् यस्य कार्यस्यादिस्तदिदं कार्यं महदादि । महानित्युच्यते बुद्धिः, अहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि एतत्कार्यम् । {कार्य[त]स्तस्योपलब्धिः प्रधानस्येत्यर्थः । तदव्वं (तत्पूर्व्वं or तदिदं) कार्यं दृष्ट्वा त्रिगुणं प्रधानमपि त्रिगुणं [त]दप्य[१३ब]न्यदस्ति प्रधानमिति । किञ्चान्यत्—**प्रकृतिविरूपम्** । प्रकृतिः प्रधा[न]मित्यर्थः । प्रकृतिविरूपं प्रकृतेरसदृशमित्यर्थः । प्रकृतिसरूपं प्रकृतिसदृशमित्यर्थः । यैर्यैर्हेतुभिः प्रधानं + प्रधानस्य सदृशं व्यक्तं सन्त(न्ति) तेऽपि हेतवः, यैश्च हेतुभिः [अ]सदृशं व्यक्तं प्रधानात् तेऽपि हेतवः सन्ति । लोके पितुस्तुल्यः पुत्रः चातुर्यैर्यदि(चातुल्यश्च । यदि) रूपेण तुल्यं(ल्यः) गुणैर्न्न तुल्य[:], [यदि] गुणैस्तुल्यो न रूपेण । एवं च व्यक्तं प्रधानस्य तुल्या न तुल्याश्च (तुल्यं न तुल्यं च) । हेतूनुपरिष्टाद्वक्ष्यामः ।

अत्राह—तिष्ठतु तावदेतत्सारूप्यं [वैरूप्यं] चोत्तर-(or चान्तर-?) प्रश्नं प्रब्रूहि । सतां ह्येष समयः । तावत्श्चात् (तावत्प्राक् ?) (प्रश्नं प्रब्रूहि तावत्प्राक् । सतां ह्येष समयः ?) } [१४ब—continued] यमर्थं शिष्यः

+ प्रधानं is superfluous.

{ } The passage between these brackets has been transferred from its place in the manuscript as it is clearly required here. See Notes.

पृच्छति तं(स) शिष्यं प्रीत्याचार्येण वक्तव्यं(व्यः)। प्रकरणमपि परित्यज्य आचार्यः शिष्यं ब्रवीत्युत्तरप्रश्नम् इति ॥

अत्राह शिष्यः यदेतन्महदादि कार्यं तत्प्र(त्प्रा)गुत्पत्तेः स्यात्( सत्) अ(आ)होस्विदसदिति। कुतः आशङ्केति चेद्धेतुः आचार्यविप्रतिपत्तेः संशयः। इहा(ह) [१५अ] विप्रतिपन्ना वि(वै)शेषिका अ(आ)र्हता बु(बौ)द्धाः। वैशेषिकास्तावत् प्रागुत्पत्ते[:] मृद्दण्डे(मृत्पिण्डे) घटो नास्तीति व्यवसिताः। अस्ति नास्तीति चार्हताः। नैवास्ति नैव [नास्ति] इत्युपगतः - - - - *(इत्यभ्युपगमपक्ष एष ?) बौद्धानाम्। एवं व्यवस्थिते कोऽत्र निश्चयो भवतीति। अत्रोच्यते—आर्हतानां प्रतिषेधं वक्ष्यामि। आर्हतानां सदसत्कार्यं तत् कथयति—यदि सत् असन्न भवति, यद्या(द्य)सत् त(स)न्न भवति। त[क]स्मात् सदसतो विरुद्धानां (सदसतोर्विरोधात्। बौद्धानां) पक्षपरिग्रहाभावात् तैस्तैसह सकल्पः (नास्ति तैः सह संजल्पः ?)। वैशेषिकाणामसत्कार्यप्रतिषेधं वक्ष्यामि। तद्यथा ॥छ॥

**असदका(क)रणादुपा[१५ ब] दानग्रहणात् सर्व्व[सं]भवा[भावा]त्।**
**शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥ ९ ॥**

असत् अकरणात् (**असदकरणात्**)। न सत् असत करणम् (न सत् असत्, असतोऽकरणम्) असदकरणम्। यद्यत्स (यद्यसत्) कार्यं स्यात् सिकतो(ता)भ्यस्तैलनिषंति (०निष्पत्तिः) स्यात्। न च निष्पद्यते। तस्मादसत्करणात्पस्यामः (तस्मादसदकरणात्पश्यामः) प्रधाने व्यक्तमस्ति प्रागुत्पत्तेरिति। तस्मात् सत्कार्यमिति। **उपादानग्रहणात्**। उपादानस्य ग्रहणं तस्माद् उपादानग्रहणं(णात्)। येन योऽर्थ(र्थी) इहलोके भवति स तन्निमित्तमुपादानं करोति। दध्यर्थी क्षीरस्योपादानं करोति। यद्यसत्कार्यं स्यात् उ[द]कस्य दध्यर्थी उपादानं कुर्यात्।

* Blank space for four letters (- - - -).



न [१६अ] च करोति। **संभवभावात् (सर्व्वसंभवाभावात्)**। यद्यसत्कार्यं स्यात् सर्व्वं सर्वत्र संभवेत्। तृणपांसुवालुकाभ्यः रजतसुवर्णवजा(ज्रा)दीनि क्रियेरन्। न च तत्क्रियति(ते)। तत्कार्यं प्रागुत्पत्तेः कारणस्थितम्। किञ्चान्यत् **शक्तस्य शक्त(क्य)करणात्**। इह शक्तः कुलाल[:] करणे वाक (शक्यादेव ?) मृत्पिण्ड (मृत्पिण्डाद् ?) दण्डचक्रसूत्रोदकविदला[दि]भिः शक्यं घटं करोति। नाशक्यं शक्यं+करोति। **कारणभावाच्च सत्कार्यम्**। यल्लक्षणं [कारणं] तल्लक्षणं कार्यं भवति। यथा कोद्रवेभ्यः कोद्रवा व्रीहिभ्यो व्रीहे(ह)यः निष्पाद्यन्ते। यद्यसत्कार्यं स्यात् कोद्रवेभ्यः शालीनां निष्पत्तिः स्यात्। न तु भवति। कस्मात्, **कारणभावादिति**। कारणेषु प्रागुत्पन्नं स्यात्कार्यमिति (कारणेषु प्रागुत्पत्तेः सत्कार्यमिति)। एवं पञ्चपञ्चभिर्हिं(र्हे)तुभिः प्रधाने महदादिकार्यमस्तीति। एकस्मात्सतः उत्पत्तेरित्ययमन्तरः [१६ब] प्रश्नः परिसमाप्तः ॥ ३॥६ ॥

प्रकृतं वक्ष्यामः। अत्रोच्यते ॥छ॥

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥**

प्रकृतिविरूपं [सरूपं] वे(चे ?)ति यदुक्तं तद्वक्ष्यामः। यत्र महदादिलिङ्गं प्रकृतितुल्यं च [अ]तुल्यं च, यैस्ताव[त्] तुल्यं ता[न्] हेतून् वक्ष्यामः। तदुच्यते **हेतुमत्**। हेतुमन्नाम हेतु[र]स्याती(०स्यास्तीति) हेतुमः(०मत्)। हेतुरपदेशो लिङ्गं निमित्तं प्रमाणं कारणमिति पर्याया[:] प्रधानस्येति। पर्याये शब्दा[:]। प्रधानं हेतुः। तन्महदादि लिङ्गं भूमहेतुपर्यामं (महाभूतपर्यन्तं) हेतुः (हेतुमत्)। बुद्धिः प्रधानेन तुहे(हेतु)मती। *अहंकारबुद्धी हेतुमती*। अहङ्कार(रो) बुद्ध्या हेतुमा(न्)। पञ्चतन्मात्राण्येकादशेन्द्रियाणि अहङ्कारेण हेतुमन्ति। आकाशं शब्दतन्मात्रेण हेतुमत्। वायर्शमात्रेण (वायुः स्पर्शतन्मात्रेण) हेतुमान्। तेजो रूपहेतुमात्रेण (रूपतन्मात्रेण) हेतु[१७अ]मान्(०मत्)। आपो रसतन्मात्रे[ण] हेतुमत्यः। पृथिवी गन्धतन्मात्रेण हेतुमती। एवं सर्व्वं हेतुमत्। किञ्चान्यत्, **अनित्यं**

* * This is superfluous.

\+ शक्यम् is superfluous

महदादिलिङ्गं सर्व्वम् । यस्मादुत्पद्यते तस्मादनित्यम् । मृत्पिण्डादुत्पद्यते घट इति, स चाप्यनित्यः । तमे(दे)वं महदादि लिङ्गमुत्पद्यते तस्मादनित्यानि-(०दनित्यम्) । प्रलयकाले महाभूतानि तन्मात्रेषु प्रलयं गच्छन्ति, तन्मात्राणीन्द्रियाणि अहङ्कारे, अहङ्कारो बुद्धौ, बुद्धि[:] प्रधाने । अतः सर्व्वमनित्यं व्यक्तं महदादि कार्यमिति । [किं] चान्यत्, **अव्यापि** । न व्यापि महदादि लिङ्गम् असर्व्वगतमित्यर्थः । यथा प्रधानपुरुषे(षौ) दिवि भुवि चान्तरिक्षे च वर्त्तेते (वर्त्तेते) [तथा] तन्महदादि लिङ्गं न वर्त्तन्ते(ते) । किञ्चान्यत्* अव्यापि व्यक्तमसर्व्वगतत्वात् । व्यापि प्रधानम्, कस्मात्, सर्व्वगतत्वात् । किञ्चान्यत् **अनेकं** व्यक्तम्, एन(कं) प्रधानम् । कस्मात्, कारणत्वात् । त्रयाणां लोकानां कारणं प्रधानं तस्मादेकम् । किञ्चान्यत्—अशृतं (**आश्रितं**) कार्थं व्यक्तं कार्यत्वात् नि[१७ब]राश्रयं प्रधानमकारणत्वात् । न हि प्रधाना[त् परं] किं-[च]दस्ति यस्य प्रधाने(नं) कार्यं स्यात् । तस्मान्निराश्रयं प्रधानम् । किञ्चान्यत्, **सक्रियम्** व्यक्तं यस्मात् संसारकाले संसरति महदादि लिङ्गम् । निष्क्रियं प्रधानं कस्मात् सर्व्वगतत्वात् । **सावयवं** व्यक्तं शब्दादिभिर्युक्तमित्यर्थः । निरवयवं प्रधानं निराश्रयमित्यर्थः । न हि शब्दादयः प्रधाने विद्यन्ते तस्मान्निरवयवं प्रधानम् । किञ्चान्यत्, **परतन्त्रम्** । आत्मनः [न] प्रभवतीत्यर्थः । स्वतन्त्रं [प्रधानम्] आत्मनः प्रभवतीत्यर्थः ।+ एवमेतद् व्यक्तो(क्ता)व्यक्तयोर्व्वैरूप्यं व्याख्यातम् । वैधर्म्म(र्म्य)मित्यर्थः ।

साधर्म्म(र्म्य)मिदानीं वक्ष्यामः । प्रकृतिसरूपं चेत्युक्तम् । तदुच्यते ॥

**त्रिगुणमविवेकि विषयं(यः) सामान्यमचेतनं प्रसवधर्म्मि ।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा [च] पुमान् ॥११॥**

इदमव्यक्तं चेति तस्य व्याख्यानम् । **त्रिगुणमव्यक्तम्** (त्रिगुणं व्यक्तम्) । सत्त्वं रजतमांसि (सत्त्वरजस्तमांसि) त्रयो गुणाः । तैर्गुणैर्बुद्धिरहङ्कारः तन्मात्राणीन्द्रियाणि पञ्चमहाभूतानि त्रिगुणानि । अत[१८अ]स्त्रिगुणमव्यक्तम् (त्रिगुणं व्यक्तम्) । किञ्चान्यत्, **अविवेकि** । विचित्रपृथग्ता वेतेस्यपि त्रीणि प्रत्यये विवेकि( विवेकः पृथक्ता वा तस्यास्तीति इनि प्रत्यये विवेकि ?) । न विवेकि अविवेक(कि) इत्युक्तं भवति । इमानि सत्त्वरजस्तमांसि इदमव्यक्तं (इदं व्यक्तम्) [इति] पृथक् न शक्यते वक्तुम् । यथा गौरश्वमिति-(यथाऽयं गौरयमश्व इति), एवं तावद् व्यक्ता(गुण)व्यक्तयोर्व्विभागो न शक्यते वक्तुम् । ये गुणास्तद(द्) व्यक्तं तस्मादुच्यते अविवेकीति । किञ्चान्यत्, **विषयो** व्यक्तमभोज्यं (व्यक्तम्, भोज्यं) सर्व्वपुरुषाणामित्यर्थः । किञ्चान्यत्, **सामान्यम्** । यथा मल्लदासी सर्व्वेषां सामान्या एवं विषया(यो) महदादि लिङ्गं सर्व्वपुरुषाणां सामान्यम् । किञ्चान्यत्, **अचेतनम्** । महदादि [१८ब] लिङ्गं सुखदुःखमोहा[न्] न वेदयतीत्यर्थः । **प्रसवधर्म्मि** । प्रसवधर्म्म(र्म्मोऽ)स्यास्तीति इति(इनि) प्रत्यये । बुद्धेरहङ्कारप्रसूति[:] अहङ्कारात् तन्मात्राणीन्द्रियाणि च [प्रसवन्ति, तन्मात्रेभ्यो] भूतानि च प्रसवन्ति । एवं प्रसवधर्म्मि । व्यक्तगुणादिप्रसवधर्म्मिषूक्तमिति (व्यक्तं त्रिगुणादिप्रसवधर्म्म्यन्तमिति ?)

किञ्चान्यत्, **तथा प्रधानम्** । यथा त्रिगुणं व्यक्तं तथा प्रधानमपि त्रिगुणम् । कस्माद्, इहलोके यदात्मकं कारणं तदात्मकं कार्यं भवतीति । यदि कृष्णास्तन्तवः कृष्णपटो भवति । अथा(थ) शुक्लास्तं[त]वः शुक्लपटो भवति । एवं महदादि लिङ्गं त्रिगुणं दृष्ट्वा अनुमानेन साधयामः तदपि प्रधानं त्रिगुणं भव[१९अ]तीति । यतः प्रधानः(ने) सत्त्वरजस्तमांसि त्रयो गुणाः व्यक्ते* न स्युः व्यक्ते ते गुणाः कुतः स्युः । पश्यामः प्रधानमिव त्रिगुणम् । किञ्चान्यत्—अविवेकि व्यक्तं त्रिभिर्गुणैर्न्न वियुज्यते । किञ्चान्यत्+ अने(न्ये) गुणाः अन्य-

* किञ्चान्यत् is superfluous.

\+ लिङ्गम् is not explained.



* व्यक्ते is superfluous. Or should it be emended as यदि ?

\+ किञ्चान्यत् is superfluous.

द्व्यक्त[म] इति न शक्यते वक्तुम् । न तथा प्रधानं पि(०नमपि) गुणैर्युक्तम्-(गुणैर्वियुक्तम् ) । अन्ये गुणाः अत(अन्य)त्प्रधानमिति [न] शक्यते वक्तुम् । किञ्चान्यत्, व्यक्तं सर्व्वं(र्वं)पुरुषभोज्यं सामान्यविषयत्वात् । व्यक्तं सामान्यं मल्लदासीवत् । प्रधानमपि विषयत्वात् सर्व्वं(र्वं)पुरुषसाम(मा)न्यम् । अचेतनं व्यक्तं, प्रधानमप्यचेतनं सुखदुःखमोह(हा)न्न वेदयतीति । कथमवगम्यते, लोके दृष्टत्वादचेतनं भवति । अचेतना[त्] मृत्पिण्डो(ण्डा)दुत्पन्नो घटः अचेतनो दृष्टः । एवमिदं व्यक्तं त(य)दा अचेतनं प्रधानमप्यचेतनं भव(वि)ष्यतीति गम्यते । किञ्चान्यत्, प्रसवधर्म्मि । किं* प्रसवधर्म्मि व्यक्तमित्युक्तम् । प्रधानमपि प्रसवधर्म्मि । किं+ प्रसवधर्म्मि बुद्धिः(द्धिं ?) प्रसव[ति] इति तथा प्रधानमपि । एवमेतत् व्यक्ताव्यक्तयोः सा[१९ब]धर्म्यं व्याख्यातम् । यदुक्तं स्व(स)रूपं चेति तस्य वचनस्य र्या (वचनस्य चर्चा ? ) समाप्ता ॥११॥

अत ऊर्ध्वं व्यक्ताव्यक्तपुरुषाणां साधर्म्यं वैधर्म्यं च व्याख्यास्यामः । **तद्व(द्वि)परीतस्तथा च पुमान्** । ताभ्यां विपरीतः इत्यर्थः स पुमान् (ताभ्यां विपरीतः स पुमानित्यर्थः) । त्रिगुणं [व्यक्तम]व्यक्तं च निर्गुणं(णः) पुरुषः । सत्त्वरजस्तमांसि त्रयो गुणाः पुरुषे न सन्ति, व्यक्ताव्यक्तयोः सन्ति तस्मान्निर्गुणः पुरुषः । किञ्चान्यात्, अविवेकि [व्यक्तम]व्यक्तं च, विविक्तः पुरुषः गुणैर्व्वियुक्त इत्यर्थः, विशुद्धः । किञ्चान्यत, विषयो व्यक्तमव्यक्तं च, विषयी पुरुषः भोक्ता इत्यर्थः । किञ्चान्यत्, सामान्यं व्यक्तमव्यक्तं च, निःसामान्यं(न्यः) पुरुषः । किञ्चान्यत्, अचेतनं व्यक्तमव्यक्तं च सुखदुःखमोहान्न संवेदे(द)-यतीत्यर्थः । पुरुषो वेदनि(वेदयति) [इति] चेतन(ना)वान् । प्रसवधर्म्मि व्यक्तमव्यक्तं च, अप्रसवधर्म्मा(र्म्मी) पुरुषः, न किञ्चित् पुरुषात् प्रसूयते । तस्मादुच्यते तद्विपरीतस्तथा च पुमान् । किञ्चान्य[२०अ]त् । तथा च पुमापुमान् (पुमान्) । हेतुमान्(हेतुमत्) [व्यक्तमहेतुमत्] प्रधानं पुरुषोऽप्यहेतुमान् । न ह्यन्यस्मात् पुरुष उत्पद्यते । किञ्चान्यत्, अनित्यं

* किम् is superfluous.

\+ किम्=कस्मात् ? See Notes.



व्यक्तं नित्यं प्रधानं पुरुषोऽप्य(पि) नित्यः । कस्मात्, अनुत्पत्तिकत्वात् । किञ्चान्यत्, अव्यापि व्यक्तमसर्व्वगतत्वात् । व्यापि [प्र]धानम्, कस्मात् सर्व्वगतत्वादित्यर्थः । पुरुषो[ऽपि] व्यापी सर्व्वं(र्वं)गत इत्यर्थः । किञ्चान्यत्, सःक्रियं (सक्रियं) व्यक्तं संसर[ती]त्यर्थः । अथ निष्क्रियं प्रधानम् , पुरुषोऽपि निष्क्रियः सर्व्वगतत्वात् । किञ्चान्यत्, आश्रितं व्यक्तम्, अनाश्रितं प्रधानं, पुरुषोऽप्यनाश्रितः प्रधानतुल्य इत्यर्थः । किञ्चान्यत्, लिङ्गं व्यक्तं प्रलयकाले प्रधाने लयं गच्छति । अलिङ्गं प्रधानं [न] क्वचिल्लयं गच्छति । पुरुषोऽप्यलिङ्गः प्रधानवत् । गुणैर्व्वियुक्ता(क्तोऽ)निबद्धः । किञ्चान्यत्, विषयो व्यक्ता(व्यक्तम)व्यक्तं च विषयी पुरुष[ः] भोक्ता इत्यर्थ । सामान्यं व्यक्तमव्यक्तं च, निःसामान्यः पुरुषः । किञ्चान्यत्, अचेतनं व्यक्तमव्यक्तं च, चेतनः पुरुषः । किञ्चान्यत, सो(सा)[२०ब]वयवं परतन्त्रं* व्यक्तं विपरीतं* शब्दस्पर्शरसरूपगन्धवत्युक्तं (०न्धयुक्तं) भवति । निर-[व]यवौ प्रधानपुरुषौ । व्यक्त(नाव्यक्ते) शब्दादयः सन्ति तस्मान्न(न्नि)-रवयवं प्रधानं, पुरुषोऽपि निरवयवः । शब्दादयः पुरुषे न सन्ति । किञ्चान्यत्, परतन्त्रं व्यक्तमात्मनः न प्रभवतीति । स्वतंत्रं प्रधानमात्मनः न+ प्रभवतीति । पुरुषोऽपि स्वतंत्रः आत्मनः प्रभवतीत्यर्थः ।

एवमेतदार्याद्वयेन प्रधानपुरुषव्यक्तानां साधर्म्यं वैधर्म्यं च व्याख्यातम् । इत्यत्राह—त्रिगुणं व्यक्तमव्यक्तं चेति । तत्र के गुणाः किमात्मकाः किंलक्षणाः किंवृत्तयश्च यैर्गुणैस्त्रिगुणं व्यक्तमव्यक्तं चेति । अत्रोच्यते—

**[प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।]**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥१२॥**

**प्रीत्यप्रीतिविष(षा)दात्मका इति** । प्रीतिश्च अप्रीतिश्च विषादश्च आत्मनि (आत्मा ?) येषां भवन्ति ते गुणाः प्रीत्यप्रीतिविषादात्मकाः द्वन्द्वो बहुव्रीहिः । तत्र

* परतन्त्रम् is superfluous here, and so also विपरीतम्.

\+ न is superfluous, and creates misunderstanding.

प्रीतिः सत्त्वम्, अप्रीति[:] रजः, विषादस्तमः एतद् गुण[२१अ]लक्षणम् । किञ्चान्यत्, **प्रकाश[प्र]वृत्तिनियमार्था[:]**, प्रकाशश्च[प्र]वृत्तिश्च नियमश्च येषामर्था भवन्ति ते गुण(णाः) प्रकाशा(श)प्रवृत्तिनियमार्थाः । तत्र प्रकाश(प्रकाशार्थं) सत्त्वं प्रवृत्त्यर्थं रजः नियमार्थं तमः । किञ्चान्यत्, **अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः** । इदमाख्यातं कदाचित् सत्त्वमुत्कटीभूत्वा रजस्तमसी अभिभवति, यथा आदित्यप्रकाशः ग्रहनक्षत्रतारागणा(ण)प्रकाशमभिभवति दिवा । यदा रजः उत्कटीभवति तदा सत्त्वतमसी अभिभवति । यदा तमः उत्कटीभवति तदा सत्त्वरजसी अभिभवति । [२१ब] एष(व)मन्योन्याभिभवा गुणाः । अन्योन्याश्रयाः परस्परमाश्रिता गुणा वर्त्तते(न्ते) । यथा त्रयो दण्डाः त्रिदण्डभूतमन्योन्यमाश्रित्य कुण्डिकां धारयन्ति, एवमन्योन्यमाश्रित्य गुणाः सर्व्वकार्याणि कुर्व्वन्ति । तस्मादुच्यते अन्योन्याश्रया इति । किञ्चान्यत्, [अन्योन्यं] जनयन्ति गुणाः । कदाचित् सत्त्वं गुण(रज)स्तमसी जनयति, कदाचित्तमः सत्त्वरजसी जनयति [कदाचित् तमः सत्त्वरजसी जनयति] । से(ए)वमन्योन्यं गुणां-(गुणा) [जनयन्ति ?] । यथा मृत्पिण्डः घटं जनयति, तन्तवः पटं *तद्वा(द्व)देवमन्योन्यमाश्रयन्ति गुणणाः (०न्यं जनयन्ति गुणाः ?) । यथा देवदत्तः यज्ञदत्तः विष्णुमित्रा(त्रः) (or देवदत्तयज्ञदत्तविष्णुमित्राः) परस्परं बोधयन्ति 'उत्थितः सूर्यः उत्तिष्ठ[तु] [२२अ] भवान्' इति, एवं बुद्धिस्थानानि सत्त्वरजस्तमसी बोधयति-(एवं बुद्धिस्थं सत्त्वं रजस्तमसी बोधयति ?) । एवं सत्त्वेन बोधितं रजः सत्त्वेनापि-(सत्त्वस्यापि) च क्रियां करोति तथा तमः सत्त्वेन प्रबोधितः(तं) सत्त्वस्य च रजसश्चात्मनश्च क्रियायाः(क्रियाः ?) तासां तिसृणामेकीभावं करोति । तंतो (ततो) बोधनसामर्थ्यं भवति । एवमन्या(न्यो)न्यजनका गुणाः । यथा स्त्रीपुंसयोः (स्त्रीपुंसौ) परस्परमिथुनौ एवं गुणाः परस्परमिथुना[:] । अपि चोक्तम्—

रजसोम्मि(०सो मि)थुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
उभयोः सत्त्वर[ज]सोर्म्मिलितं तम उच्यते ॥

---

* Or is it तद्वदेव अन्योन्यम्...?



परस्परसहाया इत्यर्थः । किञ्चान्यत्, अन्योन्यवृत्त[य]श्च गुणाः । सत्त्वरजस्तमांसि अन्योन्यव्यक्तिं(०वृत्तिं) जनयन्ति । यथा काचित् स्त्री राज्ञी कुलस्त्री साध्वी राज्ञो भार्या परमरूपदर्शनीया प्रथमयौवनेन वर्त्तमाना हावभ(भा)वलीलासंपन्नाः(न्ना) सा भर्त्तु[:] सुखा भवति, आत्मनश्च बन्धुवर्गस्य च प्रीतिं जनयति । एवं सत्त्वेनात्मनो वृत्तिर्जनिता स्त्रीभूतेन । सैव स्त्री सं(स)पत्नीनां दुःखं जनयति तदमोहं[२२ब] चेति (तन्मोहं चेति) । सपत्न्यश्च द्विविधा दासीसपत्न्यश्च कुलस्त्रीसपत्न्यश्च । तत्र दासीसपत्नीनां दुःखं जनयति । इयं प्रिया भर्तुः वयमप्रिया इति दुःखमापन्ना भवन्ति । तासां मोह [उ]त्पद्यते । इयं कुलस्त्री वयं दास्या म(दास्यः स्म ?) इति कृत्वा मोहमापन्ना भवन्ति । दुःखमापन्ना भवन्ति । *तासां मोहमु(मोह उ)त्पद्यते इयं कुलस्त्री वयं दास्या-(स्य) इति कृत्वा मोहमापन्ना भवन्ति । दुःखमापन्ना* । एवं सत्त्वेन स्त्रीभूतेन रजसो वृत्तिर्ज्जनिता सपत्नीनाम् । किञ्चान्यत्, तथे(थै)व सत्त्वं स्त्रीभूतं तासं(सां) कुलस्त्रीणां सपत्नीनां मोहं जनयति । कथम् । ताः कुलस्त्री ब्रूते(कुलस्त्रियः ब्रुवते) इयमेका कुल[स्त्री] वयम[पि] कुलस्त्रीया[०स्त्रियः], इयं प्रिया भर्तुः वयमप्रिया इति मोहमापन्ना भवन्ति । एवं सत्त्वेन स्त्रीभूतेन तमसो वृत्तिर्ज्जनिता । एवं सत्त्वं तावदनेकदश(शे)नं त्रयाणां गुणानां वृत्तिं जनयति । रजसो वक्ष्यसे(ते) —यथा कस्मिंश्च देशे चोरा आगम्य ग्रामं घ्नन्ति । तस्मिन् ग्रामे [२३अ] या[:] कुलस्त्रियः तं करन्ति(ताः क्रन्दन्ति ?) । तं(त)त्र कश्चित् क्षत्रियः अश्वमारूढः तान् चोरान् हन्ति । तस्मिन् क्षत्रिये उपचारो राज्ञो (रजसो ?) द्रष्टव्यः । रान-(रज ?) इति प्रवर्त्तते । तत्क्षत्रियभूतं रजः अनश्च (आत्मनश्च ?) सत्त्वस्य च वृत्तिं जनयति । कथं गम्यत इति । तदुच्यते क्षत्रियश्चोरा[न्] हन्ति प्रा(त्रा)सेन तेषां दुःखमुत्पादयति । एवं क्षत्रियभूतेन रजसा आत्मनो वृत्तिर्ज्जनिता । किञ्चान्यत्, तस्मिश्चोरे हन्यमाने अन्यचो[राः] तमोरजोमूढाः (?) स्थाणुवच्च स्थिता भीता न शक्नुवन्ति गन्तुम् । अके (अरे ?) मयि क्षत्रियो हनिष्यति । एवं क्षत्रियभूतेन

---

* The words between these two marks are unnecessarily repeated. See Notes.

रजसा तमोवृत्तिर्ज्जनिता । तमोवृत्तिर्(त्ति) वक्ष्यामः । यथा महाकालमेघः तोयधारा ग्रसन्ति भो(तोयाध्मातो ग्रसति नभो ?) भूमिं च सविद्युद्बलाहका(को) गां(गं)भीरघोषस्वनः । इत्युक्तं मासे(मेघः) कृष्णरूपत्वात्तम एवोच्यते । स हि तमोभूतं(तः) कालमेघः त्रयाणां वृत्तिं जनयति । तमः कालमेघः कथयति(कथम् ?) तदुच्यते । कदाचित्तत्र कर्षकाणां तावत् यस्य दीक्षेत्राणां(सस्यादिक्षेत्राणां ?) तुष्टिर्ज्जे(तुष्टिं ज)नयति । वृष्ट्या बोजानि [२३ ब] प्ररोहन्ति [इति] परमतुष्टा भवन्ति । एवं कालमेघेन तमोभूतेन सत्त्वस्य वृत्तिर्ज्जनिता । किञ्चान्यत्, रजसो वृत्तिर्(त्तिं) जनयति । तत्कालमेघं दृष्ट्वा [प्रोषितभर्तृकाः] दुखमापन्ना भवन्ति । अहो वृष्टिं प्रा[वृ]ट्कालः संप्राप्तो क(भ)र्त्ता च परविषयगतो नागच्छतीति । एवं मेघभूतेन तमसा रजोवृत्तिर्ज्जनिता । तस्य काला त्रि दुःखं(तस्याः कालमेघो दुःखं जनयति ?) । किञ्चान्यत्, वि(के)चित् किल लवणसार्थवाहाः लवणशाकटिकाटिका (लवणशाकटिका) आ(अ)स्माद्विषयादन(न्य)विषयं प्रस्थिता[:] । ते शकटे व्यावर्त्तमानानां (व्यावर्त्तमानाः) कालमेघं दृष्ट्वा मोहमापन्नाः । एवं कालमेघेन तमोभूतेनात्मनो वृत्तिर्ज्जनिता । एवं तमसा त्रयाणां गुणानां वृत्तिर्ज्जनिता । तस्मादुच्यते **अन्योन्यवृत्तयश्च** वृत्तयश्च* **गुणा** इति ।

किञ्चान्यत्, वैलक्षणं(ण्यं) वक्ष्यामः । तदुच्यते—

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।**
**गुरु वरणामेक(वरणकमे)[व]+ तमः प्रदीप[व]च्चार्थतो प(वृ)त्तिः ॥१३॥**

तत्र सत्त्वं यस्येदं लक्षणं लघुत्वं प्रकाशत्वं च । य[२४अ]दा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि भवन्ति, शुद्धानि चेन्द्रियाणि विषयग्रहणसमा(म)र्थानि भवन्ति । तदा मन्तव्यमद्य मे सत्त्वमुत्कटं वर्त्तते । रजसो वक्ष्यामः । तदुच्यते—**इष्टमुपष्टम्भकं चलं च रजः** । यथा युद्धार्थी वृषः प्रतिवृषं दृष्ट्वा

* वृत्तयश्च is superfluous.

+ गुरु वरणकमेव.



उपष्टम्भयति, एवं [यदा] देवदत्ते रज उत्कटं भवति स कलक(ह)युद्धं मृगयति । चलचित्ता(त्त)श्च भवति । ग्रामं गच्छामि नगरं गच्छामि नित्यमौत्सुक्यममा(ना) भवन्ति(ति) । एतद्र[ज]सो लक्षणम् । तमसो वक्ष्यामि । तदुच्यते—**गुरु वरणकमेव ल(त)मः** । यदा तमं(म) उत्कटं भवति तस्मिन् देवदत्तङ्गदत्ते (देवदत्ते यज्ञदत्ते) वा तस्य रूप(गुरू)ण्यङ्गानि भवन्ति, इन्द्रियाणि च आवृत्तानि भवन्ति विषयग्रहण(णा)समं(म)र्थानि भवन्ति ।

+[अत्राह—परस्परविरुद्धानां गुणानां कथमेकार्थवृत्तिर्भवति ।] परस्परविरुद्धाश्च शत्रवः एव(क)म[२४ब]र्थं न कुर्व्वन्ति । परस्परविरुद्धाश्च(श्चा)मी गुणाः । ते नु पुरुषार्थं न कुर्वन्ति । अत्रोच्यते—**प्रदीपवत्** । प्रदीपेन तुल्यं प्रदीपवत् तेन तुल्यं क्रिया चर्वधीयते (चेत् वतिर्विधीयते ?)× । तैलाग्निवर्त्तिसंयोग[:] प्रदीप इत्युच्यते । यदा(था) ते(तै)लाग्निवर्त्तयः परस्परा(र)विरुद्ध(द्धा) भवन्ति पुरुषार्थं साधयन्ति, गर्भगृहगतान् घटादीन् प्रकाशयन्ति । एवं तैलाग्निवर्त्तिभूता[नि] सत्त्वरजस्तमांसि त्रयो गुणाः पुरुषार्थं कुर्व्वन्ति । तस्मात्तदुच्यते **प्रदीपवच्चार्थतो वृत्तिरिति** ।

अत्राह—त्रिगुणमविवेकि विषयमि(विषय इ)त्येक(व)मादि [उक्तम्] । अयमविवेक्यादिर्ग्गण[:] अचेतनात्तद्व्यक्तिसिद्धः(अचेतनान्तो व्यक्ते सिद्धः) । तथा च प्रधानमित्युक्तम् । तत्कथं व्यक्तेऽपि(अव्यक्तेऽपि) सिद्धिं(द्धिः) भवति [इति] संदेहः । संदेहादयमंन्तर(०यमन्तर)प्रश्नोऽस्ति । तत्त्वेन ब्रूहि । अत्रोच्यते—कुतः संशयः । [२५अ] कस्माद्, अनुपलब्धेः । अनुपलभ्यमानं(नः) अविवेक्यादिर्ग्गणः पञ्चकः कारणं(कारणे) विद्यत इति एतत् कथमवगम्यते । तथा प्रधानमे(मि)त्येव(वा)भावात् न मृष्यते । अनेनोपोद्घातेन इयमार्या

+ A few words seem to have been omitted here—अत्राह परस्परविरुद्धानां गुणानां कथमेकार्थवृत्तिर्भवति. The scribe's eye wandered from one परस्पर to the other.

×तेन तुल्यं क्रिया चेद्वतिः—Aṣṭadhyayī 5. 1. 115.

अत्रोच्यते । अविवेक्यादिपञ्चको विद्वन्मुखम्(०खाद्) अवगम्यते। कस्मात् । अस्माद्——

**अविवेक्यादि[ः] सिद्धस्त्रैगुण्यं(ण्यात्) तद्विपर्ययाभावात् ।**
**क(का)रणगुणात्मकत्वात् कार्यस्याव्यक्ति(क्त)मपि सिद्धम् ॥१४॥**

सोऽयमविवेक्यादिर्गणः अव्यक्ते न गृह्णीमः(गृह्यते) । प्रधानमित्यत्रोच्यते । तद्विपर्ययाभावात् । आचार्यो ब्रवीति । यदि व्यक्तं गृह्णासि अविवेक्यादिना गणेन युक्तमव्यक्तमपि ग्रहीतुं [शक्यं] तथा । कथम् । **तद्विपरीय(०पर्य)याभावात्** । यत्रैव तन्तवस्तत्र पटः । [२५ब] अन्ये तन्तवो दूरे स्थिता सन्निकृष्टे पट इति भवति । यद्यु(दु)क्तं भवति [यः] पटं पश्यति स तन्तूनं(न्) पश्यति । एवस(मे)तत् । तन्तुपटवत् व्यक्ताव्यक्तयोः संबन्धः न (स ?) हि भवति—दूरे प्रधानं सन्निकृष्टे[ऽ]प्रधानमिति । *यदुक्तं पश्यति तस्माद्* गृह्णोमा(मो) यदात्मकं कार्यं भवति तदात्मकं कारणमिति । यथा शुक्लैस्तन्तुभिः(भि)-रारब्धो पटो(टः) शुक्लो भवति । अथ कृष्णास्तन्तवः कृष्णपटो भवति । एवं महदादि लिङ्गमपि वाक्यानां (अविवेक्यादीनां) गणेन [युक्तं] पश्यति यो वा यथा व्यक्तं पश्चात् प्रधानं दृष्ट्वा सधयामि (साधयति) प्रधानमपि अविवेक्यादिवो(ना) गणेन युक्त(क्तम्) इति । तस्माद्व्य(द् अव्य)**क्तमपि सिद्धम्** । एतैर्ग(र्गु)णैः [युक्तम]व्यक्तमपि ।

तत्र [य]दुच्यते भवता अ[२६अ]विवेक्यादि[:] सिद्धस्त्रैगुण्याद्व्यक्ते अव्यक्तमपि सिद्धम् । अत्राह—इहलोके यन्नोपलभ्यते तन्नास्तीति, त(य)था द्वितीयमनीश्वरे [शिरः]स्तीति याहुमिति (यथा द्वितीयमनीश्वरे शिरस्तृतीयो बाहुरिति) तथा च प्रधानं नोपलभ्यते तत्कथमवगम्यते अस्ति प्रधानमिति ।

* * See Notes–The text should be यदुक्तं भवति यो व्यक्तं पश्यति स चाव्यक्तमपि पश्यति । यो वा प्रधानं पश्यति स व्यक्तमपि पश्यति । तस्मात् विपर्ययाभावात् सिद्धमव्यक्तम् । कुतश्च सिद्धम् । कारणगुणात्मकत्वात् कार्यस्य । लोके गृह्णीमो...



अत्रोच्यते—इतिलोके हिन्ममतः पलाग्रपरिमाणो(इहलोके हिमवतः उपलाग्रपरिमाणं) नोपलभ्यते तच्चानुपलभ्यमानमस्ति । अत्राह को हेतुरित्यत्रोच्यते—

**भेदानां परिमाणात् समत्वायाछत्तिः(समन्वयाच्छक्तितः) प्रवृत्तेश्च ।**
**क(का)रणकार्यविभागादविभागाद्वैश्वरूप(प्य)स्य ॥१५॥**

अभि(स्ति) प्रधानम् । कस्मात्, **भेदानां परिमाणात्** । इहलोके यस्य कर्त्ताऽति तस्य परिमाणं दृष्टं, यथा कुलालः परिमितात् मृत्पिण्डाद् घटं करोति प्रस्थग्राहिणा(ण)माढकग्राहिणं चेति । तथैवायं परिमितं पटं करोति तन्तुभिः पंचप[२६ब]लिंकं वा (पञ्चपल्यंकं वा ? ) इ–*हव (इहैवं or इह च) महदादि लिङ्गं परिमितम् । एका बुद्धिः एकोऽहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि । एवमेतं(तद्) व(व्य)क्तं परिमितं दृष्टम् । अतः अनुमानेन साधयामः । अस्ति तत्प्रधानं यतः(यद्) इदं व्यक्तं परिमितमुत्पादया(य)तीति । यदि प्रधानं न स्यात् निष्परिमाणमिदं व्यक्तं स्यात् इति । भेदानां परिमाणं पश्यामः । अस्ति प्रधानं कारणमिति योऽस्मा(यस्मा)दिदं व्यक्तमुत्पादयति(मुत्पद्यत) इति । अतश्चास्ति त्र+ प्रधानम् । कस्मात् । **समन्वयात्** । इह लोके समन्वयं(यात्) सिद्धिर्दृष्टा । यथा कश्चित् ब्रह्मबटुं दृष्ट्वा समनुगच्छति नूनमस्य बटोः मातापि ब्राह्मणी पितापि ब्राह्मण इति । एवं त्रिगुणं [व्यक्तं] दृष्ट्वा अतः पश्यामः व्यक्तस्य यत्कारणं तदपि त्रिगुणं भविष्य[२७अ]तीति । तेन समन्वया[त्] पश्यामः अस्ति प्रधान[म्] इति । अतश्चास्ति प्रधानम् । कस्मात्, **शक्तितः प्रवृत्ति(त्ते)श्च** । इह लोके त(य)स्मिन्नेवार्थो(र्थे) य[ः] शक्तस्तस्मिन्नेवार्थे× प्रवर्त्तते । यथा कुला[लो] घटकरणे मृत्पिण्डात्, तन्त(न्तु)वायः पटकरणे । अतः साधयामः प्रधानः स्यात् (प्रधानस्या)प्यस्ति शक्तियेया शक्त्यादै(शक्तमिदं) व्यक्तमुत्पादयितुम् । सा च शक्तिः निराश्रिता न भवति । तस्मादस्ति प्रधानं यतः

* Space for one letter. See Notes.
+ त्र seems to be superfluous here. Or is it अत्र ?
× The manuscript has स्मिन्ने twice (०स्तस्मिन्नेस्मिन्ने०)

शक्तिः प्रवर्त्तत इति । तस्मादस्ति प्रधानसि(म् । इ)तश्चास्ति प्रधानम् । **कारणकार्यविभागात्** । कारणं च कार्यं च कारणकार्यो(र्ये) तयोर्विभागः कारणकार्यविभागः तस्मात्× कारणकार्यविभागात् । करोतीति कारणं क्रियत इति कार्यम् । इहलो[२७ब]के कारणकार्ययोः विभागो लोके÷ दृष्टः, मृत्तिका कारणं घटं(टः) कार्यम् । [घटः] मधूदकपयसां [धा]रणसमर्थो न तु मृत्पिण्डः । तन्तवः क(का)रणं पटं पटं* (पटः) कार्यम् । न तन्तवः शीतोष्णवातप्रतिघातार्था भवन्ति । एवमिदं महदादि लिङ्गं कार्यं दृष्ट्वा स(सा)धयामः [अन्यद् व्यक्तं महदादि कार्यम्] तद्विपरीतमन्यत् कारणं भवतीति साधयामः तस्मादस्ति प्रधानमिति । इहत(इत)श्चास्ति प्रधानम् । **अविभागाद् वैश्वरूप(प्य)स्य** । भजसे च यो विभागपूर्व्वस्य विभाग इति नाद (भजते च योऽविभागपूर्व्वस्य विभागम् इति नञा ?) प्रतिषेधः क्रियते । न विभागः अविभागः तस्माद् [अ]विभागात् । विश्वरूप्य(प)ता विश्वरूपत्वं वैश्वरूप्यमिति । वैश्वरूप्यं जगत् । ते(त्रयो) लोका इत्यर्थः । ते पञ्चसु भूतेषु अन्तर्भूता हि तेषां लोकानां पृथिव्यापस्तेजो [२८अ] वायुराकाशमिति भूतानि तन्मात्रेषु अविभागं गच्छं[ति] (गच्छन्ति) । अविभागे(गो) नो(ना)म [यथा] अन्यत् क्षीरमन्य[द्] दधीति इदं तु न शक्यते वक्तुं, [तथा] इदम् [अ]व्यक्तमिदं व्यक्तमिति न शक्यते वक्तुम्, अन्यम(द)हो अस्ति प्रधानं यस्मिन् महदादि लिंगमविभागं गच्छति [इति न शक्यते वक्तुम्] । तस्मादस्ति प्रधानं कारणमव्यक्तमिति ।

अत्राह—गृह्णीमस्तावत् अस्ति प्रधानमिति । तदिदानीमेकं भूत्वा कथं व्यक्तमुत्पादयति । एहध (इह हि ?)+ एकं(क)स्तन्तुः पटं नोत्पादयति । एको

× कारणकार्यविभागः तस्मात् is unnecessarily repeated in the manuscript.

÷ लोके is superfluous.

* This word is unnecessarily repeated.

+ Or is it बहुविधं (an epithet of व्यक्तम) ?



वीरणः कि(क)टं नोत्पादयति । एकं चेदं प्रधानं व्यक्तमुत्पादयतीति मन्यसे न चैकं किञ्चित् कार्य(कारण)मुत्पादनसमर्थ[म्] इति । अत्रोच्यते—

**कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाद्यः(च्च) ।**
**परिमाणतत्सलिलंवत्प्र[२८ब]कृतं प्ररिगुणाश्रयविशेषा ॥**
**(परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्) ॥१६॥×**
**(परिणामतः सलिलवत् पृथक्पृथग्भाजनविशेषात् ॥१६॥ ?)***

**कारण[मस्त्य]व्यक्तम्** । अव्यक्तं यन्नोपलभ्यते । अव्यक्तं **प्रवर्त्तते त्रिगुणतः** । ममापि प्रधाने बहुत्वमस्ति । सत्त्वरजस्तमांसि त्रयो गुणाः तस्मात् त्रिगुणं प्रधानमुत्पादयतीति । उक्तं महदादि । किञ्चान्यत्, **समुदा(द)याच्च** । यथा गङ्गा स्रोतसि समुत्पादिता महेश्वरस्वस्य (महेश्वरस्य) शिरसि निपतिता न शक्यते [स]माधारयितुम्; यथा तन्तवः [समुदिताः] पटं कुर्व्वन्ति एवं सत्त्वरजस्तमांसि समुदितास्त्रयो गुणा[ः] प्रधानस्य(स्था)+[व्यक्तं] कुर्व्वन्ति । अत्राह—सेह लोके द्विविधा उत्पत्तिर्दृष्टा । स्त्रीपुमांसौ पुत्रमुत्पादयति(तः), क्षीरं दध्युत्पादयति । के(कि)मेवं प्रधानं स्त्रीपुंसवत् व्यक्तमुत्पादयति अहोस्विः-(आहोस्वित्) क्षीरवदिति संदेहः । अत्रोच्यते । क्षीरं दधिभावे[२९अ]न परि[ण]मति । यदेतत्क्षीरं [त]देवा(व) दधिः(धि), एवं प्रधानं क्षीरवत् त्रयाणं(णां) लो[का]नां व्यन्तर्भावेन (व्यक्तभावेन) परिणमति । यदे[व] व्यक्तं तदेवाव्यक्तम् । तस्मादुच्यते परिणामवदिति (**परिणामतः** इति) । अत्राह—यद्येकस्मात्कारणात् त्रयो लो[का] उत्पद्यन्ते तेन नेक प्राप्नोति(तेनैकमनेकत्वं कथं प्राप्नोति ?) सुखिता देवाः दुःखिता मनुष्या इति । मूढास्तैर्यग्योना इति । कथमेकस्मात्कारणादुत्पन्नानां त्रयाणां लोकानां वैषम्यं भवति । अत्रोच्यते—**सलिलवत्**

× V₂ seems to comment on परिणामतः सलिलवत् पृथक्पृथग्भाजनविशेषात् ।

* See Notes

+ In the manuscript व्यक्तम् is misplaced. It is written after अत्राह instead of after प्रधानस्थाः.

**[पृथक्]पृथग्भाजनविशेषात् ।** कथमिति । सर्व्वो(र्पो)पयु(भु)क्तमुदकं विषभावेने(न) परिणमति । तदेव गवामु(गवो)पभुक्तं क्षीरभावेन । उष्ट्रोपभुक्तं मूत्रसवना-(मूत्रभावेन) पृथक्पृथग्भाजनविशेषात् । अथवा एकरसमन्तरिक्षा[२९ब]त्पतति जलं तच्च मेदिनीं प्राप्य नानो(ना)रसतां प्रतिपद्यते पृथक्पृथक्(ग)भाजन [वि]शेषात् । आकाशादोन्धारणभाजनेन (आकाशादुदन्धारण० or आकाशात्सुवर्ण-भाजनेन) परिगृहीतमम्भः मधुरभावेन परिणमातो(०मते) । एवं त्रयो लोकाः एकस्मादुत्पन्ना गुणवैषम्येन(ण) पृथग्भावेन परिणमन्ते । ननु देवानां सत्त्वमुत्कटं वर्त्तते अतस्ते सुखिताः, मनुष्याणां रज उत्कटं वर्त्तते अतस्ते दुःखिता[:] तैर्यग्योनेषु [तमः] उत्कटत्वेन वर्त्तते अतस्ते मूढाः । एषामे(एवमे ?)कस्मादुत्पन्नानां त्रयाणां लोकानां वैषम्यं भवति । यस्मादाह—अतः एव भाजनविशेषात् । एवं त(ता)वत् समधिगतं प्रधानम् ।

अत ऊर्ध्वं पुरुषसमधिग[मं] क[रि]ष्यामः । कथम् । यस्मात् उक्तं व्यक्ताव्यक्त[ज्ञ]विज्ञानता(तो) मोक्षं(क्षः)[३०अ] प्राप्यत इति । किञ्चान्यत्, यथा अव्यक्तं पञ्चभिर्हेतुभिः समधिगतम् अप्रत्यक्षत्वात् तथा पुरुषो नोपलभ्यते प्रधानवत् । तस्मादनुपलभ्यमानस्य पञ्चभिर्हेतुभिः सौक्ष्म्यात् समधिगमं कर(रि)ष्यामः तस्मादुच्यते—

**संघातपदा(रा)र्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।**
**[पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥१७॥ ]**

अस्ति पुरुषः । कस्मात् । **संघातपरार्थत्वात्** । इह लोके संघातानां [सत्त्वं] परार्थं, नापि परस्परार्थं नापि निरर्थम् । किं नु दृष्टान्तः । तद्यथा पर्यङ्काः । गात्राणां पटानां च संघातः पर्यङ्का(क) इत्युच्यते । स हि पर्यङ्का(को) न स्वार्थं करोति । ब्राह्मणवत् । यथा ब्राह्मणाः स्वमर्थं परस्परार्थमपि कुर्व्वन्ति । स्त्रीपुंसा(स)वन्न भवन्ति । निरर्थैर्न्न भवितव्यम् । तद्यथार्थं पूर्व्वेति (तत्परार्थं पर्यङ्कक्रतिः ?)[३०ब] समुष(त्प)न्ना । [त]स्मादस्ति पुरुषः यः पर्यङ्का(ङ्के) शेते खट्वायां यस्यार्थं पर्यङ्का(ङ्क)कृतिः किञ्चान्यत् । मृत्तृणकाष्ठादीनां संघात[:] तृण(गृहम्) उच्यते । स चायं परार्थ(र्थः) । तद्वि(तद्वदि)दं शरीरं पंचानां भूतानां संघातः । अतः पश्यामः अस्ति पुरुषः यस्यार्थो (यदर्थोऽ)यं शरीरसंघातः । तस्मादस्ति पुरुषः इति ।



कुतः [च] पश्यामः अस्ति पुरुषः । **त्रिगुणादिविपर्ययात्** । त्रयो गुणाः यस्य गणस्यादि[:] स भवति [त्रिगुणादिः तस्य विपर्ययः त्रिगुणादिविपर्ययः तस्मात्] त्रिगुणादिविपर्ययादस्ति पुरुष इति । त्रिगुणादिविपरीतस्तत्त्वा(०तस्तथा च ?) पुरुषः अदि(धि ?)कश्च सः त्रिगुणादिविपर्यय(०विपर्ययात्) । अत्रोच्यते* उक्तं पूर्व्वस्यामार्यायां त्रिगुणमविवेकीति[का. ११] तस्मादस्ति पुरुषः । **अधिष्ठानात्** । लंघनप्लव[३१अ]वन(०प्लवन)धावनसंबंधे(०समर्थै)रश्वैर्युक्तो रथः सारथिनाधिष्ठितः प्रवर्त्तते । यद्यना(न)धिष्ठितः प्रवर्त्तते आत्मनो(नः) अवि-(प्रवि)नाशाय प्रवर्त्तते । तत्र चोक्तं पुरुषाधिष्ठितः(तं ?) प्रवर्त्तते । अतः पश्यामोऽस्ति पुरुष इति येनाधिष्ठितं प्रधानं महादादि संपादयतोति । तस्मादस्ति पुरुषः एवमेतैस्त्रिभिर्हेतुभिः अस्ति पुरुष इति । **भोक्तृत्वात् (भोक्तृभावात्)** अन्यच्च पश्यामः **कैवल्यार्थप्रवृत्तेश्च** अस्ति पुरुषः । एवमेभिः पञ्चभिर्हेतुभिः पुरुषस्यास्तित्वं सिद्धमिति ।

अत्राह—गृह्णीमस्तावत् पञ्चभिर्हेतुभिः शरीरे विभक्तो पुरुषोऽस्तीति । किं खलु एकोऽयं पुरुषः आहोस्वि[त्] प्रतिशरीरं पुरुष इति ।

अत्रोच्यते—बहवः [३१ब] पुरुष(षा) इति । कस्मात् ।

**जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्ति(त्ते)श्च ।**
**पुरुषबहुत्वं सिद्धं त्रिगुणाविदि(दिवि)पर्या(र्य)याच्चैव+ ॥१८॥**

---

* अत्रोच्यते is superfluous here. Or something is missing before it.

\+ The pratīka is त्रैगुण्यविपर्ययाच्चैव. See Notes.

**जन्म**नियमात्पश्यामो [ब]हवः पुरुषाः । यथा एकस्मिन् अधिष्ठाने बहवः स्त्रियो गर्भिण्यः । तत्र काश्चित् प्रसूताः काश्चित् प्रसविष्यन्ति । यद्येकः पुरुषः स्यात् एकस्यां प्रसूतायां सर्व्वाः प्रसवेरन् । अतः पश्यामो बहवः [पुरुषा इति । यद्येकः] पुरुषः स्याद्ये(दे)कस्मिन् जीवन्ति[ति] यथा अन्ये केचितदत्वा×—यद्येकः पुरुषः स्यात् दे(ए)कस्मिन् जन्ति (जीवति or जाते) सर्व्वे जीवेरन् (जीवेयुः or जायेरन्) । एकस्मिन् मृते सर्व्वे म्रियेरन् । तस्मान्**मरण**नियमात् पश्यामो बहवः पुरुषाः । किञ्चा[न्यत्], **करण**नियमाच्च । करणादी(नी)न्द्रि[३२अ]-याणि श्रोत्रादीनि । इहलोके पुरुषा दृश्यते(न्ते) केचिद्बधिराः [केचिदबधिराः] केचिन्मूकाः केचिदमूकाः एवमादि केचिदुपहतेन्द्रिया अन्ये अनुपहतेन्द्रियाः अतः कारणान्नियमात् (करणनियमात् ?) पश्यामो बहवः पुरुषा इति । **अयु[ग]-पत्प्रवृत्ति(त्ते)श्च**। इह लोके नानाविधा प्रवृत्तिर्दृष्टा । तद्यथा एको धर्म्मो(र्म्मे) एकः कामो(मे) एकः अर्थो(र्थे) अन्यः मोक्षा(क्षः) । अतः पश्यामः बहवः पुरुषा म(इ)ति । इतश्च बहवः पुरुषाः **त्रैगुण्या(ण्य)विपर्ययाच्चैव** । एकस्यचिद् (कस्यचिद्) ब्राह्मणस्य त्रस्यः(यः) पुत्राः । एकेन्नो(नो)त्पन्नास्तुल्यगोत्र(त्रा)श्चाव्यायं (०श्चान्योन्यभिन्नाः ?) । तत्र एकः सात्त्विकः एक राजसः [एकः तामसश्च] । यद्य(द्ये)कः पुरुष[ः] स्या[द्] *यद्येकस्मिन् सात्त्विके सर्व्वे सात्त्विकाः स्युः, एकस्मिन् राजसे सर्व्वे राजसाः स्युः, एकस्मिन् तामसे सर्व्वे ता[३२ब]-मसाः स्युः । न चैकं(वं) भवति । अतः पश्यामः बहवः पुरुषःषा(पुरुषा) इति । **त्रैगुण्यविपर्ययाच्चैव** । दासु+ (?) दर्शनात् मणिसूत्रदर्शनाच्च एकः पुरुषः इति । तं ना (तन्न ?) । एवं तावत् पञ्चभिर्हेतुभि[ः] पुरुषः(ष)बहुत्वं सिद्धम् इत्याह अस्तित्वं बहुत्वं च पुरुषाणां साधितम् ।

अत्राह—किमयं पुरुषः कर्त्ता आहोस्विदकर्त्तेति । कुतः संशयः । आचार्यविप्रतिपत्तेः । कपिलासुरिप्रभृतयः आचार्या ब्रुवत अकर्त्ता पुरुषः । कणादा-

× See notes.

* यदि is superfluous.

+ See Notes.



क्षपादप्रभृतयः कर्त्तेति अतः संशयः । किचिल्लोके(किञ्च लोको)पचारदर्शनार्थ(च) संशयः । लो(लौ)किकाः ब्रुवन्ते(ते) *पुरुषः कर्म्मणां कर्त्तेति । उपचारश्च पुरुषो गच्छति* पुरुषो धावति पुरुषेण कृतम् इत्येव[३३अ]मादिप्रतिपत्तिः(त्तेः) संशय इति । अत्रोच्यते—अकर्त्ता पु[रु]षः । कस्माद् यस्मादाह—

**तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।**
**कैवल्यं माध्यस्थ्यं द्रष्टि(ष्टृ)त्वमकर्तृभावाच्च ॥१९॥**

**तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्येति** । तस्मादिति त्रिगुणादिविपर्ययाच्चैव सिद्धं साक्षित्वमस्य पुरुषस्य+ । साक्षिभावः साक्षित्वं, केवलभावः कैवल्यं द्रष्टृभावः[द्रष्टृत्व]मिति । एवमकर्तृव्यं(त्वं) वो (च ?) इत्थम् । तस्मादेवंविधात् कारणा[त्] इति । अथ व्यक्ताव्यक्तविपरीतः पुरुषः स क(य ?)स्मादुक्तस्तद्विपरीतस्तथा च पुमान्, तस्माच्च विपर्यासादकर्त्ता पुरुष इति । सत्त्वरजस्तमांसि त्रयो गुणाः कर्त्तारः तस्मात्तेभ्योऽन्यः पुरुषः साक्षिभूतः । [३३ब] यस्माक्षित्त(यस्मात्साक्षी त)स्मात्केवलः, यस्मात्केवलस्तस्मान्मध्यस्थः, यस्माद् मध्यस्थः तस्मादकर्त्ता । अयं चतुरो दृष्टान्तः । यथा किल परिव्राजकः, स ग्रामे प्रतिवसति । ते ग्राम्या लोकाः क्षेत्रकर्मा(र्म)णि प्रवर्त्तन्ते निवर्त्तन्ते च । स परिव्राजकः केवल एव मध्यस्थः तेषु प्रवर्त्तमानेषु न प्रवर्त्तते यस्मात्तस्मादकर्त्तेति तेषां कर्म्मणाः(णाम्) । एवं पुरुषः परमात्मा । सत्त्वरजस्तमांसि त्रयोः (त्रयो गुणाः) प्रवर्त्तन्ते पुरुषः परिव्राजकवत् भृत्यो(अन्यो ?) गुणेभ्य इत्यधः(र्थः) । यस्मात्केवलः तस्मान्मध्यस्थः, [मध्यस्थः यस्मात् तस्माद् द्रष्टा । द्रष्टा] यस्माद् गुणानां तस्मादकर्त्तेति । गुणाः कर्त्तार इत्यर्थः । एवं पुरुषस्यास्तित्वं बहुत्वं च प्रसाधितम् ।

अत्राह—यस्य(द्य)कर्त्ता पुरुषः अध्यवसायं कः करोति धर्म्मं करिष्यामि अर्थं साधयिष्यामि [इति] । अचेतनाश्च गुणाः [३४अ] यद्यध्यवसायं

** The expression पुरुष...गच्छति is unnecessarily repeated in the manuscript.

+ After पुरुषस्य we find in the manuscript सिद्धं साक्षित्वमस्य पुरु(ष)स्या(स्य) सिद्धं साक्षित्वं साक्षित्व which is obviously superfluous.

करिष्यन्ति [सचेतनाः स्युः]। अचेतनाश्च गुणाः इत्युक्तम् । यद्यध्यवसायं करिष्यन्ति(ति) [पुरुषः] कर्त्ता वा करिष्यन्ति (भविष्यति)। अकर्त्ता च पुरुष इत्युक्तम् । तस्मादयं दोषः । अतः उच्यते—

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।**
**गुणाः(ण)कर्तृत्वे च तथा कर्त्तेव भवत्युदासीना(नः) ॥२०॥**

**तस्मा**दिति हेत्वर्था पञ्चमी। तेन संयुक्तः(क्तम्)। किमुक्तं भवति। पुरुषश्चेतनः । प्रधानस्याद(दा)[व]चेतन्य(न)ता(प्रधानस्यादावचेतनता) । तेन संयुक्तं चेतनेन पुरुषेण अचेतनं महदादि लिङ्गं चेतनवद्भवति। यथा लोके अनुष्णशीतो घटः शीताभिरद्भिः संयुक्तः शीतो भवति। अथोष्णाभिः संयुक्तं(क्तः) उष्णो भवति। एवं महदादि लिङ्गमचेतनमपि पुरुषसंयोगाच्चेतं(०च्चेतनं) भवति । तस्मादध्यव[३४ब]सायं कुर्वन्ति गुणाः कर्म्मणि कार्ये पुरुषः* । किञ्चान्यत्, **गुणाः कतृत्वे-(गुणकतृत्वे) च तथा कर्त्ते[व] भवत्युदासीनः**। अत्र दृष्टान्तः। केचित् किल चोराः ग्रामं हत्वा कृतकार्याः स्वग्रामं गच्छन्ति। तैश्च सह गच्छभि(द्भिः) सह कश्चिद् ब्राह्मणक्ष(श्रो)त्रियः पन्थानं गच्छन्ति(ति) । ततः चोरा गच्छमानाः(गच्छन्तः) राजपुरुषैर्गृहीता यूयं चोरा इति । सोऽपि ब्रा[ह्म]णो गृहीतः स(अ)यमपि चोर इति। एवमचोरोऽपि चोरसं[स]र्गा-च्चोरा(रो) भवति। एवमिहापि सत्त्वरजस्तमांसि त्रयो गुणाः कर्त्तार इति ते(तैः) संयुक्तः पुरुषः अकर्त्तापि स कर्त्तेव भवति। कर्तृसंयोगा(ग)भावात्। [त]तश्च लोकोपचारो भवति पुरुषो गच्छति पुरुषो धावति पुरुषेण कृतमिति। एवं पुरुषसंसर्गादचेतनं महदादि लिङ्गं चेतनवद्भव[३५अ]ति। पुरुषोऽपि गुण-संग्सर्गादकर्त्तापि सन् स कर्त्तेव भवति।

तत्र यदुक्तं पुरस्ताद् व्यक्ताव्यक्त[ज्ञ]ज्ञानामीक्षं(०ज्ञानान्मोक्षः) प्राप्यत इति। तथा प्रसाधितम्। पुरुषधर्म्मा [अ]पि स्तृ(त्रि)भिरार्याभिः प्रधानास्तित्वा-नेकत्वं वेदयति (?)।+

* पुरुष seems to be wrongly placed here.
\+ See Notes.



अत्राह—उक्तं तावत् संयोगादचेतनं महदादि लिङ्गं चेतनावद्भवति। उक्तं चेतनः पुरुषः स(अ)चेतनं प्रधानं तथा तयोः प्रधानपुरुषयोः किंहेतुकः संयोगः। अत्रोच्यते—

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।**
**परवंध(पङ्ग्वन्ध)वदुभयोरपि संयोगस्तत्कृतः सर्ग्गः ॥२१॥**

पुरुषस्तु दर्शनार्थं पुरुषेणा(ण) (प्रकृत्या ?) सह सां(सं)युज्यते। सगुणं गण-(सगुणगणा) प्रकृतिः भास्ततो (भोः, ततो ? ) द्रष्टव्येति। अ[य]मर्थः संपद्यते पुरुषस्य प्रकृतिं द्रक्ष्यामि(मी)ति। प्रधास्यास्य(प्रधानस्या)यमर्थः अस्य तपस्विनः अज्ञानस्य(अज्ञाने) वर्तमानस्य के(कै)वल्यं करिष्यामीति। यथा राज(जा) पुरुषेण सह संयुज्यते प्रेषणं मे करिष्यतीति। पुरुषोऽपि राज्ञापि* संयुज्यते वृत्तिं [३५ब] मे दास्यतीति। एवं यथा राजपुरुषयोः अर्थहेतुकः संयोगः एवं प्रधा[न]-पुरुषयोरपीति।

कथमिति चात्र दृष्टान्तः। **पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः संसर्ग्गः(सर्ग्गः)**। त(य)था कदाचिदुज्ज[य]न्याः सार्थ्थः पाटलिपुत्रं प्रस्थितः । स च सार्थ्थश्चोरैर्हृतसर्व्वस्वः समन्ताज्जगाम। स्वजनपरित्यक्तः पन्थानमपश्यन् समन्तादन्धः परिभ्रममाणः मं—ना(पङ्गुना) दृष्टः। को अध मा नैः (भो अन्ध मा भैषीः)। अहं पङ्गुः मार्ग्गदर्शने कुशलः गन्तुमसमर्थः। अन्धेनाप्युक्तः पङ्गुर्यथा भवान् तथाहमपि न शक्नोमि गन्तुमिति। मम गमनसामर्थ्यमस्ति दृक्सामर्थ्यं नास्ति। अहं स्कन्धेनादाय भवतु(भवन्तं) यास्यामि(मी)ति। त्वमपि मम पन्थानं दर्शय। एवं योऽप्यर्थहेतुकः संयोग-स्तद्वान् पङ्गुवत् पुरुषो द्रष्टव्यः। अन्धवत् प्रधानम्। पुरुषे दृक्सामर्थ्यं प्रधाने+ क्रियासामर्थ्यम्। तयोः कृया(ता)र्थयोः विभागो भवति। तौ पङ्ग्वन्धौ देशान्तरं प्राप्तौ। अन्धोऽपि स्वजनेन सह[३६अ]संगः(संगतः)।

* This अपि is superfluous.
\+ प्रधा is written twice in the manuscript.

पङ्गुरपि स्वजनेन सह संगतः । एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा न्नि(नि)-वर्त्तते । पुरुषोऽपि प्रधानं दृष्ट्वा मोक्षं गतमनयो(गतः×। तयो)स्तत्कृतः सर्ग्गः ॥छ॥

एतास्ता मूलिकाः समाप्ताः ॥ ❁

"अस्तित्वमे[कत्व]मर्था(था)र्थवत्त्वं परार्थ(पारार्थ्य)मन्य[त्व]मथो निवृत्तिः(त्तिः)। योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य च शेषवृत्तिः ॥–"
एवमेते मूलिकार्थाः । वियोगं वि(च ?)शेषवृत्तिः(त्ति)मुत्तरत्र वक्ष्यामि ।

अत्राह–तत्कृतः सर्ग्ग इति उक्तम् । प्रधानपुरुषयोगः सर्ग्ग उच्यते स्त्रीपुंसवत् । यथा स्त्रीपुंसयोः संयोगात् पुत्रोत्पत्तिर्भवति एवं प्रधानपुरुष-संयोग(गा)त् सर्ग्ग उत्पद्यते. स्त्रीपुंससंसर्ग्गः सृष्टिरित्यर्थः। स च त्रिविधः । तत्त्वसर्ग्गः भावसर्ग्गः भूतसर्ग्गः । सति वक्तव्ये तत्त्वसर्ग्गस्तावत् (०सग्ग तावत्) वक्ष्यामः । कस्मात् । प्रयोजनवत्त्वात् । तस्माच्च पूर्व्वं महदादिलिंम(ग)-स्योत्पत्तिं ब्रूमः । तस्मादिह पुरस्तात् तत्त्वसर्ग्ग इत्युक्तम् । तस्य सर्ग्गस्य कः क्रमः इत्यत्रोच्यते ॥

**प्र[३६ब]कृते र्म्हते महाहङ्कार(प्रकृतेर्महांस्ततोऽहङ्कारस्त)स्माद्गणश्च षोडशकः ।**
**तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥२२॥**

**प्रकृति(ते)र्म्महा[न्]** । प्रकृतिः प्रधानं ब्रह्म बहुधानकं पर्यायशब्द(ब्दा)-स्तस्मा[त्](स्तस्याः ?) प्रकृतेः पञ्चमी विभक्तिर्भू(र्भ)वति । प्रकृतेर्म्महानुत्पद्यते कश्चित् । महा[न्] बुद्धिः मतिरिति पर्यायाः । तत्प्रधाना[त्] महानुत्पद्यन्ते(ते) बुद्धिरित्यर्थः । ततोऽप्यहङ्कारः । तस्मा[न्म]हतः अ[हं]काराद(अहङ्कार उ)त्पद्यते । **तत** इति तद्धि[त]प्रत्ययः पञ्चम्य(म्या)स्तदर्थे। अहङ्कारः(०रस्य) इमे पर्यायशब्दाः अहङ्कारः भूतादिस्ते(स्तै)जसो वैकृत इति ।

× गच्छति would be better.



**तस्मान्य(द्ग)णश्च षोडशकः** । तस्मादहारा(तस्मादहङ्कारात्) षोडशको गण उत्पद्यते । तेषामे(तस्मादे ?)कादशेन्द्रियाणि पञ्च तन्मात्राणि एष षोडशको गण इति । शब्दतन्मात्रं [स्पर्शतन्मात्रं] रूपतन्मात्रं [रसतन्मात्रं] गन्धतन्मात्रम् । एतानि पञ्च बुद्धीन्द्रियाणि पञ्च तन्मात्राणि गणः मनश्च (एतानि पञ्च तन्मात्राणि पञ्च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियानि मनश्च) एष षोडशगणको(षोडशको गण) इत्युच्यते ।

किञ्चान्यत्, **तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि** । शब्द-तन्मात्रादाकाशम्, स्पर्शतन्मात्राद्वायुः, [३७अ] रूपतन्मात्रात्तेजः, रसतन्मात्रा-दापः, गन्धतन्मात्रात्पृथिवी । एवं पञ्चभ्यः तन्मात्रेभ्यः पञ्च तन्मात्राण्यु-(महाभूतान्यु)त्पद्यन्ते इ[त्य]र्थः ।

तत्र यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानं(०नात्) मोक्षं(क्षः) प्राप्यत इति । एवं तद्व्यक्तं महदादि भूतपर्यन्तम्। अव्यक्तमपि [पञ्चभिः] हेतुभिर्व्याख्यातम् । ज्ञश्चापि पञ्चभिर्हेतुभिः समधिगतः । अपि चोक्तम्——

पञ्चविंशते(ति)तत्त्वज्ञो यत्र यत्राश्रमे रतः ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥

प्रधानं बुद्धिरहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च म[हा]भूतानि पुरुष इति । यथैव(तदेव)मेतानि पञ्चविंशतितत्त्वानि परिसमाप्तानि ।

अत्राह–प्रकृतेर्म्महा[नि]त्युक्तम् । उत्पद्यन इति । तस्य महतः किं लक्षण-मिति । अत्रोच्यते——

**अध्यवसायो बुद्धिः धर्म्मो ज्ञानं विरागमै(विराग ऐ)श्व[३७ब]र्यम् ।**
**सात्त्विकमेतद्रूपं ता[म]समस्माद्विपर्यस्तम् ॥ २३ ॥**

**अध्यवसा[यो] बुद्धिः** । अध्यवसायाछ(०यल)क्षणा बुद्धिः अयं घट इति । एतद् बुद्धेः लक्षणम् । किञ्चान्यत् । सा बुद्धिरष्टाङ्गा उच्यते । अथ

कान्यष्टांगानि । अत्रोच्यते । चत्वारि सात्त्विकानि चत्वारि तामसानि । तत्र सात्त्विकानि वक्ष्यामः । धर्म्मो ज्ञानं च* वैराग्यमैश्वर्यं चत्वारि सात्त्विकानि । तत्र धर्म्मो नाम यमनियमलक्षणः । तत्र यमाः के नियमाः के ।

"अहिंसा ब्रह्मचर्यं च सत्यमव्यवहारता ।
अस्तेयमिति पञ्चैते [य]माः संपरिकीर्त्तिताः ॥"
"अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
अप्रमादश्च पञ्चैते नियमाः परिकीर्त्तिताः ॥"

एभिः पञ्चभिर्न्नियमैः(०भिर्य्यमैः) पञ्चभिर्न्नियमैः यः स धर्म्मा(र्म्मो) व्याख्यातः । ज्ञानं वक्ष्यामः । ज्ञानं तु द्विविधो(धं) बाह्य[३८अ]मभ्यन्तरं च । तत्र बाह्यं वीणावेणुतन्त्रीशिल्पव्या[क]रणादिकं व्याख्यातम् । अभ्यन्तरं गुणपुरुषान्तरज्ञानम् । अन्ये गुणाः सत्त्वरजस्तमांसि पुरुषोऽन्य इति । एतदाभ्यन्तरं ज्ञानं च व्याख्यातम् । बाह्येन ज्ञानेन लोकोत्पत्तिः अभ्यन्तरेण अपवर्ग इति ज्ञानं व्याख्यातम् । वैराग्यं व्याख्यास्यामः । विरागभावो वैराग्यम् । तच्च द्विविधं बाह्यमभ्यन्तरं च । तत्र बाह्यम्—आर्योन-(अर्जन)रक्षण[क्ष]यः(य)संगहिंस(सा)दोषान् विदित्वा विरक्तः प्रव्रजितः तस्य नास्ति मोक्षः बाह्येन ज्ञानेन । एतद् बाह्यम् । अभ्यन्तरं वैराग्यं वक्ष्यामः । प्रधानमन्यत् पुरुषोऽन्य इति ज्ञात्वा दृष्टानुश्रविकेभ्यो विषयेभ्यो(भ्य) उपगतः प्रव्रजितः तस्य अभ्यन्तरेण ज्ञानेन पूर्व्वोक्तेन वैराग्येण मोक्षः, बाह्येन संसार इति वैरा[३८ब]ग्यं व्याख्यातम् । ऐश्वर्यं व्याख्यास्यामः । तच्च मै(ऐ)श्वर्यमष्टगुणं वर्ण्णयन्ति । अणिमा, लघिमा, महिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वं, वशित्वमथ यत्रकामावसायित्वमिति । तत्र अणिमा अण(णुः)भूत्वा सूक्ष्माणि शरीराणि भू(कृ ?)त्वा विचरति । लघिमा नाम लघु(घुः) भूत्वा वायुवु(व)द् विचरति । महिमा नाम त्रिषु लोकेषु अर्च्चितः पूजितो भवति । प्राप्तिर्नाम यं यं मनसा प्रार्थयति तं तं प्राप्नोति । ईशित्वं नाम त्रैलोक्यस्य प्रभुर्भूत्वा विचरति । प्राकाम्यं नाम प्रचुरकामो भवति विषयानुपभोक्तुं प्रकामं

* च is wrongly placed. It should be after ऐश्वर्यम्.



समर्थः । वशित्वं नाम अन्याना(अन्यानि ?)वशमानयति भूतानि । [यत्रकामा]-वसायित्वं नाम ब्रह्मादिषु स्थावरान्तेषु यत्र त(य)त्रेच्छति तत्र तत्राप्रतिहतो भवति । [३९अ] एतानि तन्त्राणि(धर्मादीनि ?) चत्वारि सात्त्विकानि रूपाणि । यदा सत्त्वेन रजस्तमसी अभिभूयते (अभिभूते) भवतः तदा सत्त्वबहुलो भवति देवदत्तः सत्त्वबहुलं च भूत्वा तदेव प्राप्नोति । सात्त्विकानि रूपाणि व्याख्यातानि । तामसानि व्याख्यास्यामः । किञ्चान्यत् , **तामसमस्माद्विपर्या(र्य)स्तम्** । तस्माद्यो द्वि(वि)परीतो गणात् (गणः स) तामस इत्युच्यते । अधर्म्मः अज्ञानं रागो(गः) अनैश्वर्यम् इत्येतानि तामसानि रूपाणि भवन्ति । तत्र धर्म्मो व्याख्यातः यमनियमलक्षणः । तद्विपसृतम(तद्विपरीतोऽ)धर्म्मो हिंसादिसाधनजनितः । ज्ञानं व्याख्यातं बाह्यमभ्यन्तरं चेति । तद्विपरीतमज्ञानम् । वैराग्यं द्विविधमुक्तम् , तद्विपरीतमवैराग्यम् । अष्टगुणमैश्वर्यं व्याख्यातम् , तद्विपरीतमष्टविधमै(०विधमनै)-श्वर्यम् । एवं चतुर्भिः सात्त्विकैश्चतुर्भिः सात्त्विकै(तामसै)र्युक्ता बुद्धिः अष्टाङ्गा प्रकृतेरुत्पद्यते । उक्तं च बुद्धिलक्षणम् ।

अहङ्कारस्य ल[क्ष]णं वक्ष्यामः । तदु[३९ब]च्यते—

**[अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्त्तते सर्गः ।**
**एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥ २४ ॥]**

**अभिमानोऽहङ्कारः** । योऽयमभिमानः शब्देऽहं [स्पर्शेऽहं रूपेऽहं रसेऽहं] गन्धेऽहं सुभगोऽहं दर्शनीयोऽहम् अभिजनवानस्मि(स्मि), अर्च्चावानहम् । एषोऽभिमानलक्षणोऽहङ्कारः । **तस्मादहङ्काराद् द्विविधः प्रवर्त्तते सर्गः** । द्विप्रकार इत्यर्थः । कतमस्य गणस्य कश्च सर्गः । एकादशकस्य गणस्य सर्गः । एकादशकश्च इन्द्रियगणः । किमिन्द्रियगणस्य [एव] । नेत्युच्यते । **तन्मात्रपञ्चकै(क)श्चैव** । तन्मात्रपञ्चकस्यैव(०स्यापि) सर्गः । तत्रैकादशेन्द्रियाणि व्याख्यातानि । पूर्व्वमेव अहङ्कारस्य लक्षणं व्याख्यातम् ।

अत्राह–अहङ्कारस्य त्रिविधस्य कथ्यते । (अत्राह–अहङ्कारस्त्रिविधः कथ्यते । ?) वैकारिकस्तैजसौ(सो) भूतादिरिति । कथ(त)मस्मादहङ्कारादिन्द्रियाण्युत्पद्यते(न्ते) कतमस्मात्तन्मात्राणि । अत्रोच्यते–

**सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् ।**
**भूतादेस्तन्मात्रः [स] तामसस्तैजसादुभयम् ॥२५॥**

**सात्त्विक एकादश[क]** इति । यदा सत्त्वोत्कटो भवत्यहङ्क(ङ्का)रः अहङ्कारस्थे[४०अ]न [सत्त्वेन] रजस्तमसी अभिभूते भवतः, तदा सात्त्विकोऽहङ्कार इत्युच्यते । तस्य सात्त्विकस्या(स्य) अहङ्कारस्य पूर्व्वाचार्योः(र्यैः) संज्ञा कृता भवति वैकारिक इति । वैकृतोऽहङ्कारः एका[द]शेन्द्रियाण्युत्पादयति । तस्मात् सात्त्विकाणी(नी)न्द्रियाणि विशुद्धानि विषयग्रहणसमर्थानि भवन्ति । तस्मादुच्यते सात्त्विक एकादशको गणः प्रवर्त्तते वैकृता[द]हङ्कारात् । अत्राह–तन्मात्रसर्गः कुत्र[त] उत्पद्यते । अत्रोच्यते–**भूतादेस्तन्मात्रात्(त्रः) स तामसस्तैजसादुभयम्** । यदा *भूतादिस्तमोबहुलो भवत्यहङ्का[रः] अहङ्कारस्थेन तमसा सत्त्वरजसी अभिभूते [भवतः], तदा तम(मो)बहुलो(तामसो ?)ऽहङ्कार इत्युच्यते । तस्य तामसस्याहङ्कारस्य पूर्व्वाचार्यैः संज्ञा कृता [भूता]दिरिति । तस्मा[द्] + भूतादिर्भूत्वाऽहङ्कारः पञ्चतन्मात्राण्युत्पादयति । य(त)स्मात्तामसानि च तन्मात्राणि भूतानि च । **तैजसादुभयम्** । यदा र[ज]सा उत्कटो भवति अहङ्कारः× [४०ब] अहङ्कारो(रे) स्थितेनैव रजसा सत्त्वतमसी अ[भि]भूते भवतस्तदा तस्य पूर्व्वाचार्ये:(र्यैः) संज्ञा कृता तैजस इत्य(इति । त)स्मादुच्यते–तैजसादुभयमिति । कथितं योऽयं सात्त्विको भवत्यहङ्कारः यदा वैकृतको

* भूतादिः is superfluous.

\+ भूतादि is unnecessarily written twice in the manuscript. तस्माद् also is superfluous here.

× अहंकारः is written twice in the manuscript.



भूत्वा इन्द्रियाण्युत्पादयति तदा तैजसमहङ्कारं सा(स)हायं गृह्णाति । यस्मात्तैजसे क्रियास्तीति क्रियासात्त्विकेन तैजसं सयुक्त(क्रियासहितेन तैजसेन संयुक्त) इन्द्रियाण्युत्पादयति । एवं सात्त्विकोऽहङ्कारः राजसेन प्रेर्य्येत्ते(ते) । सोऽयं तामसेन भूत्वादि(तामसो भूतादि)संज्ञातोऽहङ्कारः यदा तन्मात्राण्युत्पादयति तदा तमेव तैजसंसं(तैजसं) सहायं गृह्णाति एवं सात्त्विके(राजसे ?) तस्मिन् क्रियास्तितिः क्रियाः (क्रियास्तीति कृत्वा) । तामसः एकाकी न शक्नोत्यादाय(शक्नोत्युत्पादयि)तुं तन्मात्राणि । ततस्तजसेन क्रियावता संयुक्तः तन्मात्राण्युत्पादयति । तदामेव तैजसं (तदायमेव तामसः ?) ते(तै)जसेन(ना)हङ्कारेण प्रेर्यते । एवं ते(तै)जसेनाहङ्कारेण इन्द्रियाणि च कृतानि भवन्ति तन्मात्राण्युभयप्रवर्त्तकत्वात् । तस्मादुच्यते–तैजसादुभया [४१अ]दिति(०भयमिति) ।

अत्रहंका(अत्राह–अहङ्का)रा[द्] एकादशको गण उत्पद्यते इत्युक्तमिति । तस्य गणस्य संज्ञा विधेया इति । अत्रोच्यते–

**बुद्धि(द्धी)न्द्रियाणि चक्षु[ः]श्रोत्रघ्राणरसनस्पर्शनानि ।**
**वाक्पाणिपादपायूपस्थ(स्थाः) कर्म्मेन्द्रियाण्याहु[ः] ॥२६॥**

**बुद्धीन्द्रियाणि** । तेषामेकादशानामिन्द्रियाणां यान्यादौ [कथितानि ?] तानि बुद्धीन्द्रियाणि भवन्ति । स्वं स्वं विषयं बुद्ध्यन्तीति बुद्धीन्द्रियाणि । तेषां पञ्चानामियं संज्ञा भवति । **चक्षुःश्रोत्र[घ्राण]रस[न]स्पर्शनानि** । अथ कर्म्मेन्द्रियाणां कतमा संज्ञा भवति । [४१ब] **वाक्पाणिपादपायूपस्थाः कर्म्मेन्द्रियाण्याहुः** । स्वं स्वं कर्म्म कुर्व्वती(न्तो)ति कर्म्मेन्द्रियाणि । एवमेतानि पञ्च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि पूर्व्वोक्तानि । चक्षुरादीनि रूपादिविषयंतानि(०विषयनियतानि) पञ्च कर्म्मेन्द्रिया[णि] वागादिविषयनियतानि । तत्र कर्म्मेन्द्रियाणां वृत्तिः । वाक्यादयार्थश्लोकानुच्चारयति (वाक् पादपादार्धश्लोकानुच्चारयति ?) । एतद्वाकर्म्मः (एतद्वाक्कर्म) । व्यायामकर्म्माणि हस्ते(स्तौ) कुरुते । एतद्धस्तयोः कर्म्म(र्म्म) भवति । एवं निम्नोन्नतेषु विहरणं भूप्रदेशेष(षु) पादौ कुरुताम् । एतत्पा[४२अ]दयोः कर्म्म । भुक्तमाहारमुत्सृजति एतत्पादयोः-

(एतत्पायोः) कर्म्म । आनन्दं करोत्युपस्थे(स्थः ?) पुत्रांश्चोत्पादयति । एतदुपस्थ-कर्म्म । इत्येवमेतानि पञ्च कर्म्मेन्द्रियाणि । पञ्चबुद्धीन्द्रियाणि(णां) चक्षुरादिभिः संज्ञा भवति । तथा विहितानि ।

अत्राह—अथ मनः किंलक्षणं किमात्मकश्चेति(०त्मकं चेति) ।

**अत्रोच्यते—**

**संकल्प[क]मत्र मनः तच्चेन्द्रियमुभयता(था) समाना(समा)ख्यातम् ।**
**षंतष्यूगा(अन्तस्त्रिका)लविषयं तस्मादुभयप्रचारं तत् ॥२७॥**

**संकल्पकं** विचार[क]मित्यर्थः । अ[त्र] मनः इन्द्रियगणस्य यः संकल्पस्तन्मनः । किमुक्तं भवति । संकल्पाध्यवसायलक्षणं मनः । उभयात्मकं **तच्चें-[द्रि]यं[४२ब]द्रियं(तच्चेन्द्रियम्)** । यः कर्म्मगुणपरिणामविशेषनानात्वं बाह्यभेदश्च (?) । उभयात्मक[म्]इति द्विविध[म्] इत्यर्थः । कर्म्मेन्द्रियेष्वपि कर्म्मेन्द्रियं बुद्धीन्द्रियेष्वपि बुद्धि(द्धी)न्द्रियं मनः । **उभयथा* समाख्यातम्** । उभयेन प्रकारे[णे]त्यधः(र्थः) । कथम्, यस्माद् बुद्धीन्द्रियाणि च संकल्पयति कर्म्मेन्द्रियाणि च, तस्मादुभयात्मकं मनः । कथम् । यथा कश्चिद्देवदत्तः मल्लेषु मल्लः गोपालेषु गोपालः तद्वन्मनः । किञ्चान्यत्, **समाख्यातम्** बुद्धीन्द्रियकर्म्मेन्द्रियाणां साधर्म्यमित्यर्थः । यस्मात् सात्त्विकादहङ्कारा:(रात्) कर्म्मेन्द्रियाणि च [बुद्धीन्द्रियाण्युत्पद्यन्ते] तस्मादेव मनः उभयप्रचारं भवति । बुद्धि(द्धी)न्द्रिय-[४३अ]प्रवृत्तिश्चेति । तत्र बुद्धे(द्धी)न्द्रियवृत्तिः, शब्दादयो विषयाः, कर्म्मेन्द्रियाणामपि वृत्तिर्व्याख्याता वचनादयः आनन्तामिनस्तु (आनन्दान्ताः, मनस्तु) संकल्पो वृत्तिः । यथा कश्चिद्बटुः शृणोति ग्रामान्तरे आमन्त्रणमिति । तत्र यास्यामि एष संकल्पः मनसो व्यावृत्तिः (वृत्तिः) । तस्मादुच्यते संकल्पकमिन्द्रियं च मन इति । अतस्त्रिकालविषषी (०विषयम् or विषयि) इत्यथः । तस्मादुभयप्रचारवत् ।

* य is written twice—उभययथा.



अत्राह—एतान्यो[न्ये]कादशेन्द्रियाणि केन कृतानि पुरुषेण आहोस्विदीश्वरेण स्वभावेनेति । कुतः आशंक(केति) । आचार्यायां(णां) विप्रतिपत्तेः । इह केचिद् आचार्याः पौरुषाणीन्द्रि[४३ब]याणि च स्मर्यन्ते (च स्मरन्ति ?) । त(य)स्माच्चैतन्यं पुरुषस्य अचेतनं प्रधानामिमे च एकादशेन्द्रियार्थाः ततः तेषामेकादशोनां-(०शानाम्) एकद(एकादश)ग्राहकाना(णा)मिन्द्रियाणां [पुरुषः कर्त्ता] तस्मात् पुरुषेण कृतानोन्द्रियाणि इति । नाहङ्कारेणेति । तथा ईश्वरेन्य(रेणेत्य)-परे । अपरे ईश्वराणोन्द्रियाणि । त(क?)स्मात्, प्राकृतिमाचेतन्यात् (प्रकृतेरचैतन्यात् ?) । याश्चे(श्चै ?)वाष्टौ प्रकृतयो क(प्रकृतयस्ता) अचेतना[:] किंचिज्ज्ञाश्च, पुरुष(स्त)द्विपरिक्तो(द्विपरीत)श्चान्योऽस्ति सर्वज्ञस्तेनैतानीन्द्रियाणि कृतानि । यश्चासौ भगवानीश्वरः कर्त्ता स्वर(त)न्त्र इति । तस्मादीश्वराणीन्द्रियाणीति । स्वाभावा(वि)[४४अ]काणि(नि) इन्द्रियाणीति । उक्तं च—

येन शुक्लीकृता हंसा[:]शुकाश्च हरिती[कृ]ता[:] ।
बर्हिण:(ण)श्चित्रिता येन स नो वृत्तिं विधास्यति ॥

अतः आशङ्केति । अत्रोच्यते—इति(इह ?) शास्त्रे सांख्य(ख्ये ?)पुरुषोऽप्यश(का)रणमीश्वरोऽप्यकारणम्, स्वभावो नाम नैव कश्चिदस्ति* पदार्थोऽस्ति । अत उच्यते—**गुणपरिणामविशेषाना(न्ना)नात्वम्** । नानाविधो भावः नानात्वम् । सत्त्वरजस्तमांसि यथा परिणमति(न्ति) अहङ्कारस्था गुणाः परिणमन्ति । इमे एकादशेन्द्रियार्था भिन्नाः । शब्दादयः [पञ्च] वचनादयः पञ्च संकल्प एवमेकादशेन्द्रियार्थाः । तेषामेकादेद(०मेकाद)शेन्द्रियाणि भवन्ति । ते च गुणाः परिणमन्ति ।

यदप्युक्तमाचैतन्य (०क्तमचेतनानां) प्रवृत्तिरयुक्तो(क्ता) तत्र ब्रूमः । अचेतना[ना]मपि प्रवृत्तिर्दृष्टा शास्त्रे वक्ष्यतीति । तस्मादचेतना गुणा एकादशेद्रि(न्द्रि)यभावेन परिणमन्ति ।

* अस्ति is superfluous.

अत्राह—गृह्णीमस्तावत् एकादशेन्द्रियाण्यहङ्कारादुत्पन्नानि। तथा च निक्षेपः केन कृतमिन्द्रियमिति (कृत इन्द्रियाणामिति)। चक्षुरुच्चैः सन्नि[४४ब]विष्टमालोचनसमर्थं भवति। शिरःप्रदेशे श्रोत्रं सन्निविष्टं दूराच्छ्रवण[स]मर्थं भविष्यतीति। तच्छ(त्वक् श)रीरान्तरं बहिश्च सन्निविष्टा नान्ना(ना)स्पर्शग्रहणसमर्था भवन्ति(ति)। वागन्तमु(र्मु)खे सन्निविष्टा पदपदार्थ(पादपादार्ध)श्लोकानुच्चारयति। हस्तौ शाखान्तरे सन्निविष्टो(ष्टौ) नानाशिल्पव्यायाम[स]मर्थौ। अधः पादो(दौ) सन्निविष्टो(ष्टौ) समविषमभूमिप्रदेशेषु विहरणसमर्थो(र्थौ)। पायूपस्थो(स्थौ) गुह्यप्रदेशे सन्निविष्टो(ष्टौ) नित्यं दर्शनपरीहारसमर्थो(र्थौ)। अयं निक्षेप इन्द्रियाणां कृतः पुरुषेण ईश्वरेण वा स्वभावेन वा। एतच्छिष्येण वचनम्। ईश्वरोऽप्यकारणं, पुरुषोऽप्यकारणं, स्वभावो नैव कश्चित् पदार्थोऽस्ति। प्रधानमेवाहङ्कारस्थ(स्थैः) सत्त्वरजस्तमोभिस्त्रिभिग्गु(र्गु)णैः निक्षेपं कृतम(करोति)। ए(त)स्माद् ब्रवीमि—गुणपरिणामविशेषादेव इन्द्रियाणां बहिर्भेदादेव निक्षेप इति।

अत्राह—कतमस्येन्द्रियस्य का वृत्तिरिति। अत्राह (अत्रोच्यते)—

**रूपादे(दि)षु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।**
**वचनाद(दा)नविहर[४५अ]णोत्सर्गानन्दास्तु पञ्चानाम् ॥२८॥**

**रूपादिषु पञ्चानाम्।** रूपा(रूपमा)दौ येषां भवति [ते]रूपादयः रूप[शब्द]रसगंधस्पर्शा इत्यर्थः। तेषु पञ्चसु विषयेषु **पञ्चानांम(नामा)लोचनमात्रमिष्यते वृत्तिः।** आलोचनं ग्रहणमित्यर्थः। मात्रा शब्दां विशेषव्यावृत्तमानार्थः-(मात्रशब्दोऽविशेषव्यावर्त्तनार्थः ? or मात्रशब्दोऽविशेषव्यावृत्त्यर्थः ?)। तद्यथाः(था) भिक्षामेत्रा(भिक्षामात्रम् ?) अस्मिन् ग्रामे लभ्यते न(ना)न्यद् आमन्त्रणादि अयमर्थः। +कर्म्मेन्द्रिण्याददते (?)+। एतत्प्र[४५ब]योजनं मात्राः (मात्रशब्दस्य ?)

तत्र चक्षुः रूपविपर्यय श्रोत्रस्पर्शवृत्तयस्य स्पर्श (तत्र चक्षुषः रूपं, श्रोत्रस्य शब्दः, त्वचः स्पर्शः) जिह्वाया रसः घ्राणेन्द्रियस्य गन्धः बुद्धीन्द्रियाणां वृत्तिः। अथ कर्म्मेन्द्रियाणाम्—वाक् वक्तव्यः(०व्यम्), उपस्थः अनन्दं (आनन्दः), पेयो(पायुः) विसर्ग्गः, हस्तौ कर्त्तव्यम्, विक(ह)रणं पादौ (पादौ विहरणम्)। एषां कर्म्मेन्द्रियाणां वृत्ति(वृत्तयः) व्याख्याताः।

+ +This expression is superfluous.



अथान्तःकर[ण]स्य वृत्तिः इत्यत्रोच्यते।

**स्वालक्षण्यं वृत्तिस्त्र(स्त्र)यस्य नै(सै)षा भवति(त्य)सा[४६अ]मान्यत(न्या)।**
**सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥२९॥**

**सा(स्वा)लक्षण(ण्यं) वृत्तिः।** किमुक्तं भवति। अध्यवसायः बुद्धेर्ल्लक्षणः(णम्) उक्तं पूर्व्वम्। अध्यवसाया(य) एवं(व ?) बुद्धेर्वृत्तिरभिमानः अहङ्कारस्यैव लक्षणमित्युक्तम्। अभिमान एव तस्य वृत्तिः (संकल्प एव मनसो वृत्तिः ?) **च(सै)षा भवत्यसामान्या।** या सा प्रागभिहिता वृ[त्ति]र्बुद्धीन्द्रियाणां, न कर्म्मेन्द्रियाणाम्। यापि कर्म्मेन्द्रियाणां वृत्तिः सापि कर्म्मेन्द्रियाणामेव। तासां बुद्धीन्द्रियाणां(णा)मेव अध्यवसायं कल्पा(अध्यवसायो बुद्धेः अभिमानोऽहङ्कारस्य संकल्पो मनसो वृत्तिः ?) बुद्धया(द्धय)हङ्कारमनसो(सां) वृत्तिरभिहिता। सैषा भवत्यसामान्या। अध्यवसायो बुद्धेरेव, अभिमानोऽ[४६ब]हङ्कारस्यैव संकल्पो मनस एव यस्मात्तस्मादुक्तम्—अनन्यसामान्या (असामान्या ?)।

अत्राह—नि (निः or अ) सामान्या इत्युक्तम्। अर्थाद्गम्यते सामान्यकरणा(ण)-वृत्तिरप्यस्तीति। को दृष्टान्तः। मल्लदासीवत्। मल्लानां गणस्येव एका द(दा)सी सामान्यास्ते(स्ति)। यास्तेषामन्या गृहे कुलस्त्रियः ता न सामान्यात्(०न्याः)। एवमिन्द्रियाणामपि निःसामान्या प्रवृत्तिः कुलस्त्रीस्थानीया व्याख्याता। अत ऊर्ध्वं सामान्या सर्व्वेषामिन्द्रियाणां [या] वृत्तिः[तां] व्याख्यास्यामः। तदुच्यते—**सामान्यात् क(सामान्यक)रणवृत्तिः प्राणाद्या वायवः पञ्च।** प्राणः अपानः सा(स)मानः उदानः व्या[४७अ]नश्चेति एते षवः(वायवः) सर्वेषामिन्द्रियाणां सामान्यवृत्तिः। तत्र प्राणो नाम मुखनासिकाभ्यां नि(निः)सृतः बाह्ये च विषये प्रवृत्ते(त्तः) प्राण इत्युच्यते। मुखेन च नासिकायां(भ्यां) च यो निर्ग्गच्छति बाह्ये च विषय(ये) प्रवृत्ते(त्तः) पर्व्वतमारोक्ष्यामि ग्रामं यास्यामीति स प्राणो मन्तव्यः। अत्राह—तस्मिन् प्राणे यत्तत्

स्पन्दनकर्म्म तत्करणेन्द्रियेण(तत्केन ?) [कृ]तमिति। अत्रोच्यते—त्रयोदशविधेन करणेन तत्कृतमिति। तस्मिन् प्राणे यत्तत्कर्म्म तत्सर्व्वकरणग्रामस्य सामान्या वृत्तिरिति। अपि चात्र दृष्टान्तः। एकस्मिंश्चिद् राजगृहे पञ्जरे शुकः(काः) प्रतिवसति(न्ति)। तेभ्यो देवदत्तेन ओदनो दर्शितः। ते ओदनं दृष्ट्वा प्रचलिताः। पञ्जरा(रोऽ)पि प्रचलि[तः]। यत्तत्पञ्जरस्य चलनकर्म्म तत्सर्वेषां शुकानां सामान्य[म्]। तद्वत् प्रमाणे(प्राणे) यत्तकर्म्म तत्सर्वेषामिन्द्रियाणां सामान्यम्। किञ्चान्यत्, अपनयनादपानः, कुतश्चिदपक्रमणादपान इत्युच्य-[४७ब] ते। अपानप्रि(प्रा)यश्च देवदत्तः सर्प्पं दृष्ट्वा अपक्रमणं करोति। तस्मादपाने यत्तत्स्पन्दनकर्म्म तत्सर्वेषामिन्द्रियाणां सामान्यवृत्तिः। किञ्चान्यत्, ऊर्ध्वारोहणमापोत्कर्षे (ऊर्ध्वारोहणे अर्थोत्कर्षे ?) च प्रवृत्तिरुदान इत्युच्यते। उदानप्रायश्च देवदत्तः आत्मोत्कर्षं च मृगयते। अयमाढ्यः अय(ह)-माढ्यतरः कथं स्यादि(मि)ति। एष उदानः। उदानेन(उदाने) यत्तत्स्पन्दन-कर्म्म तत्सर्व्वेषामिन्द्रियाणां सामान्या वृत्तिः। हृद्यवस्थानं सहभावश्च तेन विकित्समान(समान ?) इत्युच्यते स वायुर्हृद्देशे वर्त्तमानः। समानबहु[ल]-श्च देव[द]त्तः एकाकी न रमते सहाव्या(ये)न विना। एष(एतस्मिन्) समाने यत्तत्कर्म (यत्तत्स्पन्दनकर्म्म) तत्सर्व्वेषामिन्द्रियाणां सामान्या वृत्तिः। किञ्चान्यत्, शरीरप्राप्त(शरीरव्याप्ति)रत्यन्त(न्ता ?)विनाभावश्च तद्व्यान इत्युच्यते यः शरीरे व्याप्य वर्त्तते तै * कृत्स्ने शरीरे आ नखकेशात्। स व्यानबहुलो देवदत्तः अन्योन्येन विना न रमते मृगवत्। तस्मिंश्च[४८अ]त्तु(यत्तत्) स्पन्दनकर्म्म तत्सर्वेषामिन्द्रियाणां सामान्यवृत्तिः। एवमेते पञ्च वायवः त्रयोदश-विधस्य कर[ण]स्य [सामान्या] वृत्तिः। रूपादयश्च निःसामान्या वृत्तिः। एवं तावत् करणानां च सामान्या वृत्तिर्व्याख्याता।

अत ऊर्ध्वं युगपद्वृत्तिः अयुगपद्वृत्तिर्व्याख्याता।

**ते एव(युगपच्)चतुष्टयस्य तु वृत्तिः क्रम[श]श्च तस्य निर्दिष्टा।**
**दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्व्विका वृत्तिः ॥३०॥**

* तै is superfluous.



**युगपदिति।** काले कुत्र निपातः चतुर्णां तावत्। यथा बुद्धिरहङ्कारो मनश्चक्षुरिति। एतानि युगपत् पश्यन्ति। [बुद्धिरहङ्कारो मनः श्रोत्रं युगपच्छब्दं गृह्णन्ति।] बुद्धिरहङ्कारो मनस्त्वगिति युगपत् सर्ग्गं(स्पर्शं) गृह्णाति(गृह्णन्ति)। बुद्धिरहं[४८ब]कारो मनो जिह्वां(ह्वा) युगपद् रसं गृह्णन्ति। बुद्धिरहङ्कारो मनो नासिका युगपद् गन्धं गृह्णन्ति। एवमेषां **युगपच्चतुष्टयस्य तु वृत्ति-र्न्निर्दिष्टा।** तस्यैव चतुष्टयस्य क्रमशोऽपि वृत्ति(त्तिः) [अ]युगपदित्यर्थः। देवदत्तः पन्थानं गच्छति। स्थाणुं पश्यति। तत्रास्य बुद्धिर्भ्भवे(व)[ति] स्थाणुरयं पुरुषः स्यावे(वा स्यादि)ति। स तस्मिन् स्थाणो(णौ) वल्लीं पश्यति [अतोऽस्य बुद्धिर्भवति स्थाणुरिति]। अथ ककुंधनगमनं सारणशन-कर्माणि(अथ आकुञ्चनगमनप्रसारणाशनकर्माणि ?) पश्यति अतोऽस्य बुद्धिभ(र्भ)वतं(ति) पुरुषे(ष इ)ति। एवं बुद्ध्या(द्ध्य)हङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा। [यथा] रूपं(पे) तथा शब्दादिष्वपि गन्धाद्याः* क्रमशो वृत्तिर्दृष्टा।

किं [४९अ] चान्यत्, **दृष्टे तथाप्यदृष्टे** अस्मिन् स्थाणौ च क्रमशश्च वृत्तिर्भवति। युगपददृष्टे वक्ष्यामः। तदुच्यते। अनागतेऽपि काले बुद्ध्यहङ्कार-मनसां युगपद्वृत्तिः। तेषामेव त्रयाणां शब्दे श्रोत्रपूर्व्विका वृत्तिः। तेषामेव त्रयाणां स्पर्श्य च (स्पर्शे च त्वक्-)पूर्व्विका वृत्तिः। तेषामेव त्रयाणां रजो(से) जिह्वापूर्व्विका वृत्तिः। तेषामेव त्रयाणां गन्धे घ्राणपूर्व्विका वृत्तिः। तेषामेव त्रयाणां [रूपे चक्षुःपूर्व्विका वृत्तिः]। त्रयस्य बुद्ध्यहङ्कारमनसा[म्]।

[अत्राह] एतानि का(क)रणानि स्वं स्वं विषयं कथं प्रतिपद्यते(न्ते)। अत्रोच्यते÷—एतानि [अचेतनानि कथं प्रपद्यन्ते] पुरुषेण ईश्वरेण वाधि-ष्ठितानीति। अत्रोच्यते—

**स्वां स्वां प्रति[प]द्यन्ते परस्पराकुरूत(०राकूत)हेतुकं(कां) वृत्तिम्।**
**पुरुषार्थ एव हेतुःतत(हेतुर्न) केनचित् कार्यते करणम् ॥३१॥**

* गन्धाद्याः is superfluous.
÷ अत्रोच्यते is superfluous here.

**स्वां स्वामिति** । नानावि[ध]तामधिकरणानां(नानाविधतां करणानां ?) जन्मगुणानां× युगपत्प्रयोक्तुमीप्सा । यथा गृ[४९ब]हे गृहे गन्धर्व्व इत्युक्ते कृत्स्नस्य नगरस्य ग्रहणं कृतं भवति । एवं स्वं(स्वां) स्वामो(मि)त्युक्ते त्रयोदशविधस्य करणस्य ग्रहणं कृतं भवति । तत्र दृष्टान्तः । कश्चित् किल ब्रह्मचारी बटुः ग्रामान्तरे आमंणकं (आमन्त्रणं) शृणोति । तस्य बुद्धिरध्यवसायं करोति तत्र यास्यामीति । *तत्र बु(बु)द्धेराकूतं ज्ञात्वा* आकूता(त)मिङ्गितं चेष्टम-(चेष्टा अ)ध्यवसायमि (०य इति) पर्यायाः । अहङ्कारे(रो) बुद्धि(द्धे)राकूतं ज्ञात्वाति(भि)मानं प्रपद्यते । मोदकानानयिष्यामीति । दध्योदनं चेति । अहङ्कारस्य कृतं(०स्याकूतं) ज्ञात्वा मनः स्व(सं)कल्पं प्रतिपद्यते गुडो(डौ)दनं चास्य दध्योदनं स्यादिति । (च स्याद्, दध्योदनं स्यादिति ?) । एवं त्रयस्य [आकू]तं ज्ञात्वा बाह्यान्यपि करणानि स्वां स्वां वृत्तिं प्रतिपद्यते(न्ते) । चक्षुः स्थानानि पश्यति । श्रोत्रं प्रतिवचनं शृणोति । हस्तः कुण्डिकादाने प्रतिपद्यते । पादौ विहरणे । अपि चात्र दृष्टान्तः । [५०अ] काचित्(किञ्चित्) किल चोरशतं ग्रामं हन्तुमिच्छति । चोरसेनापतिना सम्रि(म)यः क्रियते । +स्थानीन्द्रियाणि बुद्ध्या+ । यदि कश्चित् हो हेति(हा इति) ब्रवीति प्रविशन्तु भवन्तः । अथ हेतुर्ग्गच्छन्तु (अथ हा इति गच्छन्तु ?) वा प्रविशन्तु वा । चोरसेनापतिस्थानीया बुद्धिः, चोरस्थानी[यानी]न्द्रियाणि बुद्धिर(बुद्धेरा)कूतं ज्ञात्वा स्वं स्वं विषयं प्रतिपद्यते(न्ते) । अत उक्तम्–**स्वं(स्वां) स्वां प्रतिपद्यन्ते परस्पराकूतकौ(हे)तुकां वृत्तिम्**

---

× जन्मगुणानाम् is unnecessarily repeated in the manuscript.

* *The expression between these two marks is superfluous here.

+ + The expression between these two marks is superfluous here.



अत्राह–इन्द्रियाणि किं स्वार्थं विषयं प्रतिपद्यन्ते ।+ यदप्युक्तम् अचेतनानि कथं प्रतिपद्यन्त इति पुरुषेणाधिष्ठिताई(नी)श्वरेणानेति(०रेण वेति) । **पुरुषार्थ [एव] हेतुर्न्न केनचित् कार्यते करणम्** । नामी(पी)श्वरेण न पुरुषेण स्वयमेव स्वे स्वे विषये प्रवर्त्तते(न्ते) त्रया(यो)दशविधकरणा[नि]

अत्राह–'न केनचित् कार्यते करणम्' इत्युक्तम् । अथ कत(ति)विधं करणमिति । अत्रोच्यते–

**[करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।**
**कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च ॥३२॥ ]**

करणं त्रयोदशविधं बोद्धव्यम् । पञ्च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि बुद्धिरहङ्कारं(रो) मन इति । एतत् त्रयोदशविध करणं किं करोतीति । अत्रोच्यते–[आहरणं] धारणं [च] कर्म्मेन्द्रियाणां(णि) कुर्वन्ति । प्रकाशं [५०ब] बुद्धीन्द्रियाणां(णि) कुर्वन्ति । **तदाहरणं चाहरण च[प्र]काशकरम् (तदाहरणधारणप्रकाशकरम् ?)** । किं तदस्ति यस्याहरणं धारणं प्रकाशकरणं करोतीति । अत्रोच्यते–**कार्यं च तस्य दशधाऽऽहाय धार्यं प्रकाश्यं च** । **कार्य**मिति । शब्दस्पर्शरसरूपगन्धाः पञ्च, वचन(ना)दानविहरणोत्सर्गानन्दाश्च पञ्चानां एते पञ्च विषयाः (०दाश्च पञ्च, पञ्चपञ्चानामेते पञ्च पञ्च विषयाः ?) कार्यमित्युच्यते(न्ते) । तं दशविधं विषयं बुद्धीन्द्रियैः प्रकाशितं कर्म्म(र्म्मे)न्द्रियाण्याहरन्ति धारयति(न्ति) चेति ।

अथ णी(कानी)न्द्रियाणि त्रिकालविषयाणि कति वा सांप्रतकालविषयीणि । अत्रोच्यते—

**अन्त(न्तः)[क]रणं त्रिविधं [द]शधा बाह्यं त्रयस्य विषयाखं(ख्यम्) ।**
**सांप्रतकालं बाह्यं त्रिकालमभ्यन्तरं करणम् ॥३३॥**

---

+ The answer is missing here. It should be something like this–अत्रोच्यते–परार्थं विषयं प्रतिपद्यन्ते । पुरुषार्थः कर्तव्य इति विषयं प्रतिपद्यन्ते ।

**अन्तःकरणं** बुद्ध्या(द्ध्य)हङ्कारमनसां ग्रहणं(ण)मेतत् । तत् **त्रिकाल-** (त्रिविध)मन्तःकरणमित्युच्यते । **दशधा बाह्यमिति** । पञ्च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि एतद् दशविधं बाह्यमित्युच्यते । किञ्चान्यत्, **त्रयस्य विषयाख्यम्** । बुद्ध्यो(बुद्ध्य)हङ्कारमनसां त्रयाणामभ्यन्तरकरण[०करणानां] बाह्यं दशविधं विषयाख्यम्। विषयो(य उ)पभो[५१अ]ज्यं भृत्यसूतं दासभूतमित्यर्थः । अभ्यन्तरं स्वामिभूतमिति । त्रिकालं* **सांप्रतकालं** विषयं* **बाह्यम्** । कथं सांप्रतकालं(ल)विषयी(यि) । श्रोत्रं व[र्त्त]मानां(नं) शब्दं शृणोति, अतीतमनागतं च न शृणोति । त्वगपि वर्त्तमानं स्पर्शं गृह्णाति, अतीतमना[ग]तं [न] गृह्णाति । नासिकाऽपि गन्धं गृह्णाति वर्त्तमानम्, अतोतमनागतं [न] गृह्णाति। जिह्वापि वर्तमानं रसं गृह्णाति, अतीतमनागतं च+गृह्णाति न गृह्णाति । चक्षुरपि वर्त्तमानं रूपं पश्यति अतीतमनागतं न गृह्णाति । एवं पादौ पायुरुपस्थाश्चेति (एवं वाक् पाणिः पादौ पायुरुपस्थश्चेति) । किञ्चान्यत्, **त्रिकालमभ्यन्तरं का(क)रणमिति** । बुद्ध्यहङ्कारम[५१ब]नांसि त्रिकालविषयाणि । बुद्धिर्वर्त्तमानं बुद्ध्यते, अतीतमनागतं वा । तथा अहङ्कारो वर्त्तमाने विषयेऽभिमानं करोतीति (करोति), अतीतानागतेन(अतीतेऽनागते) वा सुखितोऽहं दुःखितोऽहमिति । मनः च वर्त्तमानं विषयं स्मरति, अतीतमनागतं [वा] स्मरति । तस्मादुच्यते 'त्रिकालमभ्यन्तरं करणम्' इति ।

अथ कानीन्द्रियाणि सविषयं(सविशेषं) विषयं गृह्णाति(गृह्णन्ति) [कानि निर्विशेषम् ] । अत्रोच्यते—

[बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।
वाग्भवति शब्दविषया शेषाण्यपि पञ्चविषयाणि ॥३४॥ ]

* त्रिकालम् is superfluous here. So also विषयम् as this seems to be a pratika,

\+ गृह्णाति after च is superfluous. Perhaps the scribe wrote the expression न गृह्णाति twice. च being a mistake for न.



**बुद्धीन्द्रियाणि तेषाम्**—येषां करणानामयमधीकरो(०धिकारो) [वर्त्तते] तेषां बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि **पञ्च** विषया[न् ] गृह्णन्ति सविशेषविशेषपञ्चा (सविशेषाविशेषान् पञ्च ?) । देवानां पञ्च [अ]विशेषाः सुखलक्षणाः एवं (एव) दुः[५२अ]खमोहादेवं(दुःखमोहौ) विषयेण (विषये न) स्त इति । इह मानुषानां त एव शब्दस्पर्शरूपरसगन्धाः सविशेषा दुःखमोहादित्यर्थः । देवानां बुद्धीन्द्रियाणि निर्व्विशेषविषया[न् ] प्रकाश[य]न्ते(न्ति ?) मानुषाणां बुद्धीन्द्रियाणि सविशेषं विषयं प्रकाशयन्ति । तस्मादुच्यते **बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि** । उक्तानि* बुद्धीन्द्रियाणि । [कर्म्मेन्द्रियाणि] वक्ष्यामः । **वाग्भवति शब्दविषया शेषाण्यपि पञ्चविषयाणि** । तत्र देवानां वाक् पदपदार्थ(पादपादार्द्ध)श्लोकानुच्चारयति । अस्माकमपि तथैव । तस्मा[द्]-देवानामपि वांती(वागि)न्द्रियम् अस्माकं च तुल्यम् । किञ्चान्यत्, शेषाण्यपि [पञ्च]वि[५२ब]षयाणि । कानि तानि च शेषाणि । वाक्पाणियूपस्था-(पाणिपादपायूपस्थाः) एते विशेषया तेषां सन्ति तानि भवन्ति (एतानि चत्वारि शेषाणि सन्ति पञ्चविषयाणि ? ) । पञ्चविषया[णि] इति किमुक्तं भवति । तेषां चतुर्णामेकमेकमिन्द्रियं पञ्चद्वि(वि)षयम् । पाणिस्तावत् शब्दस्पर्शरूपरसगन्धवत्(०वान् ) । पञ्चलक्षणा वाक्पादेन्द्रियं शब्दस्पर्शरूपवत्त्वं भूत्वा प्राग्रमुद्गतानि (पञ्चलक्षणं पादेन्द्रियं शब्दस्पर्शरूपरसगन्धवत्यां भूम्यां प्राग्रमुद्गच्छति ?), तस्मात् पञ्चविषयं पाय्वि(दे)न्द्रियम् । किञ्चान्यत् । शब्दस्पर्शरूपरसगन्धलक्षणं(णः) पायु(युः) । [उ]पस्थप्रदेशः पञ्चलक्षणः । तत्र पञ्चलक्षणादुपस्थप्रदेशादुपस्थक्रिया स्थिता पञ्चलक्षणं शुक्रं विसृजति । शुक्रमपि शब्दस्पर्शरूपरसगन्धलक्षणवत् । [५३अ] एवमेतानि चत्वारि स्पा(पा)णिपादपायूपस्थाः कर्म्मेन्द्रियाणि पञ्चलक्षणाणि स्थितानि पञ्चलक्षणविषयं गृह्णाति (गृह्णन्ति) तस्मात् पञ्चलक्षणविषयाणि भवन्ति ।

* उक्तानि is written twice in the manuscript by mistake.

किञ्चान्यत् इन्द्रियलक्षणमित्यत्रोच्यते ।

**शान्तकरणा(सान्तःकरणा) बुद्धिः सर्व्वं विषयमवगाहते यस्मात् ।**
**तस्मात् त्रिविधं करणं द्वाराणि द्वारविशेषाणि(द्वारि द्वाराणि शेषाणि) ॥३५॥**

**शान्तकरणमिति( सान्तःकरणा इति )** । अहङ्कारो मनसः करणं नीभ्यामेह वर्त्तते बुद्धिः ( अहङ्कारोऽन्तःकरणं मनोऽन्तःकरणं ताभ्यां सह वर्त्तते बुद्धिः ? or अहङ्कारो मनोऽन्तःकरणे ताभ्यां....? ), सा भवति सान्कर-णम् ( सान्तःकरणा ) । **सर्व्वं विषयमवगाहते यस्मात्** । गृह्णातीत्यर्थः । त्रिषु लोकेषु यो विषयः [तं] मनसाऽहङ्कारेण च संयुक्तं(संयुक्ता ?) बुद्धिः गृह्णाति । कश्च सः विषयः । शब्दस्पर्शरसरूपगन्धाः विषयग्रहणम् (०गन्धानां विषयाणां ग्रहणम् or ०गन्धानां विषयेण ग्रहणम् ? ) । तस्मादुच्यते **त्रिविधं करणं द्वारि** । बुद्धिर[५३ब] हङ्कारो मन इति एतत् त्रिविधं करणं द्वारि । **द्वाराणि** *यद्यत्त्रिविधं द्वारि* **[शेषाणि]** । अत्र शेषाणि(णी)त्युक्ते अथ कानि द्वाराणीत्युच्यते शेषाणि पञ्चबुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि । एतैर्दशभिर्द्वारैः त्रिष्वपि लोकेषु यो विषयस्तं गृह्णातीत्यर्थः ।

किञ्चान्यत् ,

**---(एते प्र)दीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।**
**कृत्स्नं पुरुषस्यार्थं प्रप्रकाश(प्रकाश्य) बुद्धौ प्रयच्छत(न्ति) ॥३६॥**

एवमेव (**एते** इति ?) पूर्वोक्तान्येकादशेन्द्रियाणि अहंकारश्च एतेषां पूर्वोक्तानां ग्रहणं करोति । एतानीति वक्तव्यम् । इत इतिगुणः वक्ष्यति हि न वक्तव्यम् (एत इति गुणविशेषा इति न वक्तव्यम् ?) । **गुणविशेषा** इति । गुणाः सत्त्वरजस्तमांसि । तेभ्य उत्पन्ना गुणविशेषाः । विशेषशब्दः पुंल्लिगस्तस्मादेतदिति(०देतानीति) वक्तव्यम् । **प्रदीपकल्पाः** [५४अ] प्रदीपेन तुल्याः प्रदीपकल्पाः । यथा प्रदीपः गर्भगृहे गृहे+ कृतः घटादीना(न)र्थान् प्रकाशयति

* * The expression between these two marks seems to be superfluous

\+ गृहे is superfluous.



एवमिन्द्रियं त्रिष्वपि लोकेषु यो विषयस्तं प्रकाशयति । तस्मात् प्रदीपकल्पाः । किञ्चान्यत् , **परस्परविलक्षणाः** । परस्परेण असदृशा इत्यर्थः । श्रोत्रं शब्दं गृह्णाति, न स्पर्शम् , न रूपं, न रसं, न गन्धम् । त्वक् स्पर्शं गृह्णाति न शब्दादयः (शब्दादि) । जिह्वा रसं गृह्णाति न शब्दादि । घ्राणेन्द्रियं गन्धं गृह्णाति न शब्दादि । स्वे स्वे विषय(ये) व्यवस्थितानीत्यर्थः । कुलस्त्रीवत् । तथा कर्मेन्द्रियाणि व्यवस्थितानि । [वाक् वचने], पाणिना(रा)दाने, पादौ विहरणे, पायुरुत्सर्गे, उपस्थश्चानन्दे । बुद्धिरध्यवसाये, अहङ्काराणि मने (अहंकारोऽभिमाने ), मनः संकल्पः(ल्पे) । यस्मात् स्वं स्वं विषयं गृह्णन्ति न परविषयं य(त)स्मात् परविषय(परस्परवि)लक्ष[५४ब)णाः । किञ्चान्यत् **गुणविशेषात् (०विशेषाः)** । गुणेभ्य उत्पन्नाः इत्यर्थः । **[कृत्स्नं] पुरुषस्यार्थं प्रकाश्य बुद्धं(द्धौ) प्रयच्छन्ति** । कृत्स्नस्य(कृत्स्नं) त्रिषु लोकेषु योऽयं [स्वविषयः] न परविषयः तमिन्द्रियाणां(णि) बुद्धौ प्रयच्छन्ति । बुद्धिस्थं विषयं सुखदुःखलक्षणं पुरुष उपलभति(ते) ।

[किञ्चान्यत् ]

**सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः ।**
**सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥३७॥**

**सर्व्वं** त्रिष्वपि लोकेषु योऽयं विषयः तं सर्वम् । **प्रत्युपभोगम्** यस्मादुपभुक्ते(ङ्क्ते) प्रत्युपभोगः । देवलोकं मनुष्यलोकं तिर्यग्योनितां च तं प्रत्युपभोगं कर्मेन्द्रियाणि बुद्धीन्द्रियाणि च प्रकाश्य गृहीत्वा इत्यर्थः, बुद्धौ प्रयच्छन्ति । बुद्धिः पुनः पुरुषाय प्रयच्छति । अत्र दृष्टान्तः मन्त्रिराजवत् । तद्यथा मन्त्री चा[र]पुरुषेभ्यः वार्त्तामुपलभ्य राज्ञा(ज्ञः) कथयति तद्वदे(दे)व [५५अ] यस्मात् सर्वप्रत्युपभोगमिति । ज्ञानं चोत्पद्यत इति ।

किञ्चान्यत, **सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्** । प्रधानपुरुषान्तरं नानात्वमित्यर्थः । **सूक्ष्ममिति** अनुपलभ्यं दुर्दर्शमित्यर्थः । प्रकृतिपुरुषयोरन्तरमनीश्वरमित्यर्थः । प्रधानपुरुषयोर्नानात्वमिति । तयोरन्तरं

बुद्धिर्विशेषयति । कथम्, अन्यत्वेनेति । अन्यः पुरुषः अन्य[त्] प्रधानम् । सत्त्वरजस्तमांसि त्रयो गुणाः प्र(प्रा)धानिकाः । बुद्धिरन्याः(न्या), अहंकारोऽन्यः, पञ्चतन्मात्राण्यन्यानि, एकादशेन्द्रियाणि [अन्यानि], महाभूतान्यन्यानि । शरीरोन्यमि(शारीरोऽन्य इ?)त्येवं पुरुषं बुद्धिर्बोधयति । तथा मोक्षं गच्छति । उक्तं च

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
जटी मुण्डी दण्डी [वापि] मुच्यते नात्र संशयः ॥

तस्माद् बुद्धिरेव इह पुरुष[५५ब]मभ्युदयकालेऽनुयोजयति । मोक्षं [च] करोति ।

अत्राह—यदुक्तं त्वया पूर्वमस्याम(पूर्वस्यामा)र्यायां विशेषाविशेषविषयीणि इन्द्रियाणि, तत्र न ज्ञायते के विशेषाः के अविशेषाः इति । अत्रोच्यते—

**तन्मात्राण्यविशेषाः तथा भूतानि पंचभ्यः (०षास्तेभ्यो भूतानि पञ्च पञ्चभ्यः) ।**

**एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ।३८॥**

**त[न्मा]त्राण्यविशेषाः** यानि तानि तन्मात्राणि द(अ)हंकारादुत्पन्नानि शब्दतन्मात्रं [स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं] गन्धतन्मात्रम् । एते पञ्च तत्त्वविशेषा देवानां विषयः सुखलक्षणः ! नापि ते दुःखे मन्नीत (नापि तेषु दुःखमस्ति) नापि मोहोऽस्ति, तस्मादविशेषाः । न विशिष्यन्त इति अविशेषाः, ते शान्ता घोरा मूढाश्च न तस्मादविशेषा इत्युच्यते । **तेभ्यो भूतानि [पञ्च] पञ्चभ्यः** । शब्दतन्मात्रादाकाशं, स्पर्शतन्मात्रा[द्] वायुः, रूपतन्मात्रा[त्] तेजः, रसत[५६अ]न्मात्रादापः, गन्धतन्मात्रा[त्] पृथिवी । तानि महा पञ्च(पञ्च महा)भूतानि विशेषा इत्युच्यते(न्ते) । कस्मात् । यस्मात् शान्ता घोराश्च मूढा[श्च] । तत्र शान्तास्तावत् सुखलक्षणाः प्रसादलाघवाभिष्वङ्गात् । हर्षप्रीतय[:] प्रसादाः सुखम् । यथा कश्चिद्देवदत्तः गृहे गृहे+ स्त्रीभिः सह क्रीडमानः प्रस्थितः प्रासादमारूढः । आकाशं प्राप्य सुखितोऽहम्

+ One गृहे is superfluous.



[इति] ब्रवीति । एवं तदाकाशं शान्तम् । तदेवाकाशं वायुना शीतेन संयुक्तं दुःखं जनयति । तदा घोर इत्युच्यते । तदेवाकाशं मोहं जनयति । यथा कश्चिद्देवदत्तः पन्थानं गच्छन् ग्रामान्तरं [न] पश्यति ततो मूढो भवति । एवमाकाशं कदाचित् सुखं जनयति [कदाचिद्दुःखं जनयति] कदाचिन्मोहं जन-[५६ब]यति । स एव देवदत्तः गर्म्भगृहे स्थितः प्रसादाश्रमारूढः (प्रस्वेदायासारूढः ? or प्रस्वेदश्रमारूढः ?) वातायनप्रविष्टेन वायुना स्पृष्टः सुखितौ(तोऽ)स्मीति ब्रवीति । तेनैव वायुना प्रभूतेन उष्णमिश्रेण स्(स्पृ)ष्टः दुःखितोऽहमिति । स एव वायुः वातोलीनसंजातं (वातुलेन संजातं) मोहं जनयति । मूढश्च भवति दिशां (दिशायां) पूर्व्वायां वा किमुत्तरायां वेति । एवं वायुः सुखदःखमोहं जनयति । तथा तेजः शीतेनाभिभूतस्य देवदत्तस्य सुखं जनयति घर्म्मेण संतप्तस्य दुखम् । ग्रामनगरं दाध्य (ग्रामनगरदाहे or ग्रामनगरं प्रदाह्य) मोहं जनयति । ताः आपः शीतकाले अप्समियमाहं (ताः आपः ग्रीष्मकाले घर्मार्तस्य सुखं जनयन्ति शीतकाले दुःखं जनयन्ति समुद्रगतस्य पूर्वोत्तरां दिशामपश्यतो मोहं जनयन्ति ?)।

य(त)था पृथिवी नवशाद्वला प्रावृट्काले सुखा । सैव दुःखं जनयति [अतितप्ता ग्रीष्मकाले देवदत्तस्य ?] । स एव पन्था[नं] गच्छ[न्] पृथ्वीमेवापश्यन् न* ग्रामनगरे मूढो भवति । एवं पृथिवी सुखदुःखमोहान् ज[नयति]

[Leaves 57–58 are missing.]

[५९अ] अथ के संसरन्ति । अत्रोच्यते—

**पूर्व्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम् ।**
**संसरति निरुपभोगं भावैरति(धि)वासितं लिङ्गम् ॥४०॥**

* This न seems to be superfluous. The expression here is not a happy one. The pattern is also changed. Or could it be स एव... पृथिवीमेव पश्यन्, न ग्रामनगरे, मूढो भवति ?

**पूर्व्वोत्पन्नमिति** । यदा लोका नोत्पद्यन्ते तदा प्रधानोत्पन्नं सूक्ष्मशरीरं तस्मादुच्यते पूर्व्वो[त्प]न्नमिति । किञ्चान्यत्, **असक्तं** तत् सूक्ष्मशरीरं तैर्य्यग्योनिमानुषदेवस्थानानि गच्छन्ति(ति) । पर्व्वतादिषु न प्रतिहन्यते, भित्त्वा निर्गच्छतीत्यर्थः । [**नियत**तिमि] अज्ञानोत्पत्तौ संसारे व्यवस्थितमित्यर्थः । तच्च **महदादि** । महानित्युच्यते बुद्धिः । महान् यस्यादौ तदिदं महदादि । बुद्धिरहङ्कारः पञ्च [बु]द्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि मनश्च एतानि महदादीनि यस्य आदिः सूक्ष्मशरीरस्य तद् भवति महदादि, त्रयोदशविधेन करणेन संयुक्तमित्यर्थः । किञ्चान्यत्, **सूक्ष्मा[५९ब]मपर्यन्तम्(सूक्ष्मपर्यन्तम्)** करणसंयुक्तं मातापितृजे शरीरे पतिते संसरति त्रीन् लोकान् । किञ्चान्यत्, **निरुपभोगं** तत्सूक्ष्मशरीरं त्रयोदशविधेन करणेन संयुक्तं बाह्येनोपचयेन ×मात्य(तृ)जेन(मातापितृजेन ?) विना विषयग्रहणसमर्थो(र्थं) न भवतीत्यर्थः । किञ्चान्यत्, **भावैरति(धि)वासितं लिङ्गम्** । भावा[न्] पुरस्ताद् वक्ष्यामि । तैरधिवासं(०वासितं) संस[र]ति । लिङ्गमिति प्रवलय(प्रलय)काले सूक्ष्मशरीरं कारीरं (कार्यं ?)+ कारणसंयुक्तं (सूक्ष्मशरीरं करणसंयुक्तं) लयं गच्छतीति लिङ्गम् ।

अत्राह–सूक्ष्मशरीरे[ण] नास्ति प्रयोजनम् । त्रयोदशविधं करणमेव संसरति । तत्र यदुच्यते सूक्ष्मशरीरं संसरतीति यस्मिन्मिथ्या(तन्मिथ्या) । अत्रोच्यते–

**चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया ।**
**तद्वद् विनाऽविशेषैर्न्न तिष्ठति निराश्रयं लिङ्ग[म्] ॥४१॥**

×मातृजेन is written twice by mistake in the manuscript.

+ Or is कारीरं superfluous ?



[६०अ]+–श्रयं कृत्वा चित्रकर्म्म तिष्ठति । इदानीं सू –

–च संसरति तन्मिथ्यात् (तन्मिथ्या) । किञ्चान्यत् शृब्द(शब्द!)–

–०णुर्न्न भवति । स्थाणुना विना छाया न भवति । –

–[आ]काशेन विना अवकाशो न भवति । –

[६०ब] –०व्वं(?) सूक्ष्मशरीर तेन शरीरेण विना –

–०त्वं योगान्नटवद्व्यवतिष्ठते लिङ्गम् । पुरुषाथ(र्थ) –

–ब्रह्मादिस्थावरान्तेषु पुरुषं शब्दादिविष –

–०त्र वृत्तिरिते(ति) । किञ्चान्यत्, निमित्तनैमित्तिक –

[Leaves 61–63 are missing]

